क० ४७

मंडलानि भ्रांतमुद्भ्रांतमित्यादीन्मार्गान् अनुलोमविलोमभेदेनद्विगु: ३१ मंडलानां आवर्त्तने अनुलोम[illegible] विलोमाभ्यासे ३१ अस्पश्चसे: सन्नसौ: शोभेपुंडे: ३७ ३८ ३९ ४० ४४

सोचरत्सहसा खड्गी मंडलानि सहस्रशः चतुर्दश महाराज शिक्षाबलसमन्वितः ३१ भ्रांतमुद्भ्रांतमाविद्धमाप्लुतं विप्लुतं सृतं संपातं समुदीर्णं च दर्शयामास संयुगे ३२ सौबलस्तु ततस्तस्मै शरं चिक्षेप वीर्यवान तानापतत एवाशु चिच्छेद परमासिना ३३ ततः क्रुद्धो महाराज सौबलः पुनरेव च प्राहिणोत्सुतसोमाय शरानाशीविषोपमान ३४ चिच्छेद तांस्तु खड्गेन शिक्षया च बलेन च दर्शयंल्लाघवं युद्धे तार्क्ष्यतुल्यपराक्रमः ३५ तस्य संचरतो राजन्मंडलावर्त्तने तदा क्षुरप्रेण सुतीक्ष्णेन खड्गं चिच्छेद सुप्रभं ३६ सच्छिन्नः सहसा भूमौ निपपात महानसिः अर्द्धमस्य स्थितं हस्ते सत्सरोस्तच्च भारत ३७ छिन्नमाज्ञाय निस्त्रिंशमवप्लुत्य पदानि षट् प्राविध्यत ततः शेषं सुतसोमो महारथः ३८ सच्छित्वा सगुणं चापं सौबलस्य महात्मनः पपात धरणीं तूर्णं स्वर्णवज्रभूषितं ३९ सुतसोमस्ततो गच्छच्छ्रुतकीर्त्तेर्महारथं सौबलोपि धनुर्गृह्य घोरमन्यत्सुदुर्जयं ४१ अभ्ययात्पांडवानीकं निघ्नन्शत्रुगणान्बहून तत्र नादो महानासीत्पांडवानां विशांपते ४१ सौबलं समरे दृष्ट्वा विचरंतमभीतवत तान्यनीकानि दृप्तानि शस्त्रवंति महांति च ४२ द्राव्यमाणान्यदृश्यंत सौबलेन महात्मना यथा दैत्यचमूं राजन्देवराजो ममर्द ह ४३ तथैव पांडवीं सेनां सौबलेयो व्यनाशयत ४४ इति श्रीकर्णपर्वणि पंचविंशोध्यायः ॥ ॥ ७

धृष्ट शरभोष्टपादः सिंहघातिपशुपक्षिशरीरेन सिंहव्याघ्रात्मा १ २ ३ ४ ५ ११

संजयउवाच धृष्टद्युम्नंकृपोराजन्वारयामाससंयुगे यथादृष्ट्वावनेसिंहंशरभोवारयेद्युधि १ निरुद्धःपार्षतस्तेनगौतमेनबलीयसा प
दात्पदंविचलितुं नाशकत्तत्रभारत २ गौतमस्यरथंदृष्ट्वाधृष्टद्युम्नरथंप्रति वित्रेसुः सर्वभूतानिक्षयंप्राप्तंचमेनिरे ३ तत्रावोचन्वि
मनसोयोधिनः सादिनस्तथा द्रोणस्यनिधनान्नूनंसंक्रुद्धोद्विपदांवरः ४ शारद्वतोमहातेजादिव्यास्त्रविदुदारधीः अपिस्वस्तिभवेदद्यधृ
ष्टद्युम्नस्यगौतमात् ५ अपीयंवाहिनीकृत्स्नामुच्येतमहतोभयात् अप्ययंब्राह्मणः सर्वान्ननोहन्यात्समागतान् ६ यादृशंदृश्यतेरूप
मंतकप्रतिमंभृशं गमिष्यत्यद्यपदवींभारद्वाजस्यगौतमः ७ आचार्यः क्षिप्रहस्तश्चतावकानांपरैः सह व्यश्रूयंतमहाराजतयोस्तत्र
समागमे ८ पार्षतश्चमहायुद्धेविमुखोह्यभिलक्ष्यते इत्येवंविविधावाचस्तावकानांपरैः सह ९ व्यश्रूयंतमहाराजतयोस्तत्रस
मागमे विनिश्वस्यततः क्रोधात्कृपः शारद्वतोनृप १० पार्षतंछादयामासनिश्चेष्टंसर्वमर्मसु सहन्यमानः समरेगौतमेनमहात्म
ना १० कर्तव्यंनस्मजानातिमोहेनमहताहतः तमब्रवीत्ततोयंताकच्चित्क्षेमंतुपार्षतः ११

ईदृशं व्यसनं युद्धे नेते दृष्टं मया क्वचित् दैवयोगाद्धि ते वीर सायका नापतन्मर्मभेदिनः १३ प्रेषिता छिन्नमुखेन मर्माण्युद्दिश्य सर्वतः व्यावर्त्तयन्त्येते तूर्णं न
दी वेगमिवार्णवात् १४ अवध्यं ब्राह्मणं मत्वा येन ते विक्रमो हतः धृष्टद्युम्नस्ततो राजन् शनकैरब्रवीद्वचः १५ मुह्यते मे मनस्तात गात्रस्वे
दश्च जायते वेपथुश्च शरीरे मे रोमहर्षश्च सारथे १६ वर्जयन्ब्राह्मणं युद्धे शनैर्याहि यतोऽर्जुनः अर्जुनं भीमसेनं वा समरे प्राप्य सारथे १७ क्षे
ममद्य भवेदेवमेषा मे नैष्ठिकी मतिः ततः प्रायान्महाराज सारथिस्त्वरयन्हयान् १८ यत्र भीमो महेष्वासो युयुधे तव सैनिकैः प्रद्रुतं च रथं दृष्ट्वा
धृष्टद्युम्नस्य मारिष १९ किरन् शरशतान्येव गौतमोऽनुययौ तदा शंखं च पूरयामास मुहुर्मुहुररिंदमः २० पार्षतं त्रासयामास महेंद्रो नमुचिं
यथा शिखंडिनं तु समरे भीष्ममृत्युं दुरासदं २१ हार्दिक्यो वारयामास स्मयन्निव मुहुर्मुहुः शिखंडी तु समासाद्य हार्दिक्यं नाम महारथं २२ पं
चभिर्निशितैर्भल्लैर्जत्रुदेशे समाहनत् कृतवर्मा तु संक्रुद्धो भित्वा षष्ट्या पतत्रिभिः २३ धनुरेकेन चिच्छेद हसन् राजन्महारथः अथान्यद्धनुरादाय
द्रुपदस्यात्मजो बली २४ ॥ ॥ ॥ ॥

२५ वर्मणः वर्मधाय्यच्चत्रश्यंतभ्रष्टाः वर्मेन चिच्छिदुरीत्यर्थः २८ ववामवांतवान् ३३ पार्षतं शिखंडिनं ३३   ३६

क्रम १   धर २

तिष्ठतिष्ठेति संक्रुद्धो हार्दिक्यं प्रत्यभाषत ततोऽस्य नवतिं बाणान्स[illegible]पुंखान्सुतेजनान् २५ प्रेषयामास राजेंद्र तेऽस्याभ्रश्यंत वर्मणः वि
नयात्स्तेन समालक्ष्य पतितांश्च महीतले २६ क्रुद्धेन सत्वरं तीक्ष्णेन कार्मुकं चिच्छिदे भृशं अथैनं छिन्नधन्वानं भग्नशृंगमिवर्षभं २७ अशीत्या
मार्गणैः क्रुद्धो बाह्वोरुरसि चार्पयत् कृतवर्मा तु संक्रुद्धो मार्गणैः कृतविक्षतः २८ ववाम रुधिरं गात्रैः कुंभवक्त्रादिवोदकं रुधिरेणाप
रिक्लिन्नः कृतवर्मा व्यराजत २९ वर्षेणाक्लेदितो राजन्यथा गैरिकपर्वतः अथान्यद्धनुरादाय समार्गणगुणं प्रभुः ३० शिखंडिनं बाण
गणैः स्कंधदेशेऽभ्यताडयत् स्कंधदेशे स्थितैर्बाणैः शिखंडी तु व्यराजत ३१ शाखाप्रशाखाविपुलः सुमहान्पादपो यथा तावन्योन्यं भृ
शं विद्ध्वा रुधिरेण समुक्षितौ ३२ अन्योन्यशृंगाभिहतौ रेजतुर्वृषभाविव अन्योन्यस्य वधे यत्नं कुर्वाणौ तौ महारथौ ३३ रथाभ्यां चेरतु
स्तत्र मंडलानि सहस्रशः कृतवर्मा महाराज पार्षतं निशितैः शरैः ३४ रणे विव्याध सप्तत्या स्वर्णपुंखैः शिलाशितैः ततोऽस्य समरे
बाणं भोजः प्रहरतां वरः ३५ जीवितांतकरं घोरं व्यसृजत्त्वरयान्वितः स तेनाभिहतो राजन्मूर्छामाशु समाविशत् ३६ ॥ ७

क० ४९

२२ ३९ बिरिवंशः श्वेता १ २ ३ ४ ५ ६ ७ ८ ९ १०

क्ष१

ध्वजयष्टिं च सहसा शितिम्रेपेकक्षमलाहतः अपोवाह रणात्तूर्णं सारथी रथिनां वरं ३७ हार्दिक्यं रक्षंत सैनिः स्थ्यसंतपुनः पुनः पार्जिते
ततः शूरे द्रुपदस्यात्मजे प्रभो ३८ मद्रवत्यांस्त्वीसेनावध्यमाना समंततः इति कर्णपर्वणि संजय उवाच श्रुत्वास्त्राथ महाराज वधम
नावकं बले यथा वायुः समासाद्य तूलराशिमं ततः १ पत्नघपुत्रिगत्तीस्त्रिशिवयः कौरवैः सह शाल्वाः संसप्तकाश्चैव नारायण
बलं च ततः २ सत्यसेनश्चंद्रदेवो मित्रदेवः सुतंजयः सौश्रुतिश्चित्रसेनश्च मित्रवर्मा च भारत ३ त्रिगर्त्तराजः समरे भ्रातृभिः प
रिवारितः पुत्रैश्चैव महेष्वासैर्नानाशस्त्रविशारदैः ४ व्यसृजंत शरव्रातान् किरंतोऽर्जुनमाहवे अभ्यवर्त्तंत सहसा वार्योघा इव साग
रं ५ ते त्वर्जुनं समासाद्य योधाः शतसहस्रशः अगच्छन् विलयं सर्वे तार्क्ष्यं दृष्ट्वेव पन्नगाः ६ ते हन्यमानाः समरे नाजहुः पांडवं
रणे दह्यमाना महाराज शलभा इव पावकं ७ सत्यसेनस्त्रिभिर्बाणैर्विव्याध युधि पांडवं मित्रदेवस्त्रिषष्ट्या तु चंद्रसेनस्तु सप्तभिः
८ मित्रवर्मा त्रिसप्तत्या सौश्रुतिश्चापि सप्तभिः शत्रुंजयस्तु विंशत्या सुशर्मा नवभिः शरैः ९ स विद्धो बहुभिः संख्ये प्रतिविव्याध
तान्नृपान् सौश्रुतिं सप्तभिर्विध्वा सत्यसेनं त्रिभिः शरैः १० ॥ ॥ ॥ ॥

राम०
४९

शत्रुंजं पंचविंशत्या चंडदेवं तथाष्टभिः मित्रदेवं शतेनैव श्रुतसेनं त्रिभिः शरैः ११ नवभिर्मित्रवर्माणं सुशर्माणं तथाष्टभिः शत्रुंजयं च राजानं हत्वा नत्र
शिलाशितैः १२ सौश्रुतेः सशिरस्त्राणं शिरः कायादथाहरत् त्वरितश्चंद्रदेवं च शरैर्निन्ये यमक्षयं १३ तथेतरान्महाराज यतमानान्महारथान्
पंचभिः पंचभिर्बाणैरेकैकं प्रत्यवारयत् १४ सत्यसेनस्तु संक्रुद्धस्तोमरं व्यसृजन्महत् समुद्दिश्य रणे कृष्णं सिंहनादं ननाद च १५ स निर्भिद्य भुजं
सव्यं माधवस्य महात्मनः अयस्मयो हेमदंडो जगाम धरणीं तदा १६ माधवस्य तु विद्धस्य तोमरेण महारणे प्रतोदः प्रापतद्धस्ताद्रश्मयश्च विशां
पते १७ वासुदेवं विभिन्नांगं दृष्ट्वा पार्थो धनंजयः क्रोधमाहारयत्तीव्रं कृष्णं चेदमुवाच ह १८ प्रापयाश्वान्महाबाहो सत्यसेनं प्रति प्रभो यावदेनं शरै
स्तीक्ष्णैर्नयामि यमसादनं १९ प्रतोदं गृह्य सोऽन्यं तु रश्मीनपि यथापुरा वाहयामास तानश्वान्सत्यसेनरथं प्रति २० विष्वक्सेनं तु निर्भिन्नं दृष्ट्वा पार्थो
धनंजयः सत्यसेनं शरैस्तीक्ष्णैर्वारयित्वा महारथः २१ ततः सुनिशितैर्भल्लै राज्ञस्तस्य महच्छिरः कुंडलोपचितं कायाच्चकर्त पृतनांतरे २२

क०
५०

२३ २८ ध्वजादीनांशब्दोश्रूयतेतिपक्षेनान्वयः २९ ३० ३१ ३२ ३३ ३३ ३

द्वि१ दु४३

तेनिकृत्तशिरस्तैर्वाणैर्मित्रवर्माणमार्पयत्त वत्सदंतेनततोद्रौणसारथिंचाप्यमारिष २३ ततःशरशतैर्भूयः संसप्तकगणान्वली पातयामा
समंक्रुद्धःशतशोथसहस्रशः २४ ततोरजतपुंखेनराजनशीर्षमहात्मनः मित्रसेनस्यचिछेदक्षुरप्रेणमहारथः २५ सुशर्माणंचसंक्रुद्धोजत्रु
देशेसमाहनत ततःसंसप्तकाःसर्वेपरिवार्यधनंजयं २६ शस्त्रौघैर्ममृ क्रुद्धानादयंतोदिशोदश अभ्यर्दितस्तुतैर्जिष्णुःशक्रतुल्यपरा
क्रमः २७ ऐंद्रमस्त्रममेयात्माप्रादुश्चक्रेमहारथः ततःशरसहस्राणिप्रादुरासन्विशांयते २८ ध्वजानांछिद्यमानानांकार्मुकाणांचमारिष
रथानांसपताकानांतूणीराणांयुगैःसह २९ अक्षाणामथचक्राणांयोक्त्राणांरश्मिभिःसह कूवराणांवरूथानांपृषत्कानांचसंयुगे ३०
अश्वानांपततांचापिप्रासानामृष्टिभिःसह गदानांपरिघानांचशक्तितोमरपट्टिशैः ३१ शतघ्नीनांसचक्राणांभुजानांचोरुभिःसह कंठ
सूत्रांगदानांकेयूराणांचमारिष ३२ हाराणामथनिष्काणांतनुत्राणांचभारत छत्राणांव्यजनानांचशिरसांमुकुटैःसह ३३ अश्रू
यत महान्शब्दस्तत्रतत्रविशांपते सकुंडलानिस्वक्षीणिपूर्णचंद्रनिभानिच ३४ ॥ ॥ ॥ ॥ ७

राम०
५०

३५ हस्त्यश्वं चास्यतः छिंदतः स्वानुगाश्वत्यास्विन्नश्रेष्ठवाः सीदंत्येवं रथानां भंगं दृष्ट्वा चक्राणि नश्यंतिच्छन्नभंगादितिच्छ्रांतं कादिवेति पाठे वितयेत्वे स्पष्टवा ३९।३८ सीदमानानि यं

शिरांस्युर्व्यामदृश्यंत ताराजालमिवांबरे सव्यमंगानि सर्वामांसमिवं दृश्ये नोक्षितानिव ३५ शरीराण्यदृश्यंत निहतानां महीतले गं
धर्वनगराकारं घोरमायोधनं तदा ३६ निहतै राजपुत्रैश्च क्षत्रियैश्च महाबलैः हस्तिभिः पतितैश्चैव तुरगैश्चाभवन्मही ३७ अगम्यरूपा
समरे विशीर्णैर्गिरिव पर्वतैः नासीच्चक्रपथस्तत्र पांडवस्य महात्मनः ३८ निघ्नतः शात्रवान भल्लैर्हस्त्यश्वं चास्यतो महत आतंकादिव
सीदंति रथचक्राणि मारिष ३९ चरतस्तस्य संग्रामे तस्मिंल्लोहितकर्दमे सीदमानानि चक्राणि समूहुस्तुरगा भृशं ४० श्रमेण मह
तायुक्ता मनोमारुतरंहसः वध्यमानं तु तत्सैन्यं पांडुपुत्रेण धन्विना ४१ प्रायशो विमुखं सर्वं नावतिष्ठत भारत ताञ्जित्वा समरे
जिष्णुः संसप्तकगणान्बहून ४२ विरराज तदा पार्थो विधूमोग्निरिव ज्वलन ४३ इति कर्णपर्वणि संजय उवाच युधि
ष्ठिरं महाराज विसृजंतं शरान्बहून स्वयं दुर्योधनो राजा प्रत्यगृह्णादभीतवत १ तमापतंतं सहसा तव पुत्रं महारथं धर्मराजो
द्रुतं विद्ध्वा तिष्ठ तिष्ठेति चाब्रवीत २ स तु तं प्रतिविव्याध नवभिर्निशितैः शरैः सारथिं चास्य भल्लेन भृशं क्रुद्धोभ्यताडयत ३ ॥ ॥

कर्णार्जुनात २७ ४३ सप्तविंशोध्यायः २७ ॥ ॥

ततोयुधिष्ठिरोराजन्त्वराणीयंरवान्शिलीमुखान् दुर्योधनायविक्षेपत्रयोदशशिला शितान् ४ चतुर्भिश्चतुरोवाहांस्तस्य हत्वामहारथः पंच
मेनशिरः कायात्सारथेश्चसमाक्षिपत ५ षष्टेनतुध्वजंराज्ञः सप्तमेनतुकार्मुकं अष्टमेनतथाखड्गंपातयामासभूतले ६ पंचभिर्न्नृपतिंचा
पिधर्मराजोर्दयद्भृशं हताश्वात्तुरथात्तस्मादवप्लुत्यसुतस्तव ७ उत्तमंव्यसनंप्राप्तोभूमावेवावतिष्ठत तंतुकृच्छ्रगतंदृष्ट्वाकर्णद्रौणिकृपादयः
८ अभ्यवर्त्तंतसहसापरीप्संतोनराधिपं अथपांडुसुताः सर्वेपरिवार्ययुधिष्ठिरं ९ अन्वयुः समरेराजंस्ततोयुद्धमवर्त्तत ततस्तूर्यसहस्राणि
प्रावाद्यंतमहामृधे १० ततः किलकिलाशब्दाः प्रादुरासन्महीपते यत्राभ्यगच्छन्समरेपांचालाः कौरवैः सह ११ नरानरैः समाजग्मुर्वार
णावरवारणैः रथाश्चरथिभिः सार्धंहयाश्चहयसादिभिः १२ द्वंद्वान्यासन्महाराजप्रेक्षणीयानिसंयुगे विं धान्यप्यचिंत्यानिशस्त्रवंत्युत्तमा
निच १३ तेशूराः समरेसर्वेचित्रंलघुचसुष्ठुच अयुध्यंतमहावेगाः परस्परवधैषिणः १४ अन्योन्यंसमरेजघ्नुर्योधव्रतमनुष्ठिताः नहितेसमरं
चक्रुः पृष्ठतोवैकथंचन १५ ॥ ॥ ॥ ॥ ॥ ॥ ॥

२३ आभरणं चैव वभुः अवगाय हत्यवंतः २४ निमित्तं तपहेतं महांतो गजा ये यांते महागजाः गजारोहाः ज… हस्तिभिर्यो हयामा… परिणम्य विनाम्य हस्तिनामि

मुहूर्त्तमिव तद्युद्धमासीन्मधुरदर्शनं ततउन्मत्तवद्राजन्निर्मर्यादमवर्त्तत १६ रथीनागंसमासाद्यव्यचरत्सायकैःशितैः शरैःप्रेषयामास कालायशरैः संनतपर्वभिः १७ नागाहयान्समासाद्यविक्षिपंतोबहून्रणे दारयामासुरत्युग्रंतत्रतत्रतदानृप १८ हयारोहाश्चबहवः परिवार्यहयोत्तमान तलशब्दरवांश्चक्रुःसंपतंतस्ततस्ततः १९ धावमानांस्ततस्तांश्चसमारूढान्महागजान पार्श्वतः पृष्ठतश्चैवनिजघ्नुर्हयसादिनः २० विद्राव्यचबहूनश्वान्नागाराजन्मदोत्कटाः विषाणैश्चापरेजघ्नुर्ममृदुश्चापरेभृशं २१ साश्वारोहांश्चतुरगान्विषाणैर्विजघ्नूरुषा अपरेचिक्षिपुर्वेगात्प्रगृह्यातिवलास्तदा २२ पादातैराहतानागाविवरेषुसमंततः चक्रुरार्त्तस्वरंघोरंदुद्रुवुश्चदिशोदश २३ पदातीनांतुसहसाप्रद्रुतानांमहाहवे उत्सृज्याभरणंतूर्णमवप्लुत्यरणाजिरे २४ निमित्तंमन्यमानास्तुपरिगृह्यमहागजाः जघ्नुर्बिभिदुश्चैवचित्राण्याभरणानिच २५ तांस्तुतत्रप्रसक्तान्वैपरिवार्यपदातयः हस्त्यारोहान्निजघ्नुस्तेमहावेगाबलोत्कटाः २६ अपरेहस्तिभिर्हस्तैः खंविक्षिप्तामहाहवे निपतंतोविषाणाग्रैर्भृशंविद्धाःसुशिक्षितैः २७ ॥ ॥

तिशेषः विभिदुश्च शस्त्राजैरेव २५ २६ २७ । ॥

क० ५२

३० प्रतिमानेषु गजरदंतांतरालेषु प्रासैः निगृहीताः कुंभेषु तोमरैः दंतवेष्टेषु शक्तिभिश्च निगृहीताः प्रतिमानंप्रतिच्छायागजरदंतांतरालयोरितिमेदिनी ३२ ॥ ० ॥ ० ॥

अपरे सहसागत्य विषाणैरेव सूदिताः सेनांतरं समासाद्य केचित्तैर्महागजैः २८ कुसमगात्रा महाराज विक्षिप्य च पुनः पुनः अपरे च जनानीव विभ्राम्य निहता मृधे २९ परः सराश्च नागानामपरेषां विशांपते शरीराण्यपि विद्धानि तत्र तत्र रणाजिरे ३० प्रतिमानेषु कुंभेषु दंतवेष्टेषु चापरे निगृहीता भृशं नागाः प्रासतोमरशक्तिभिः ३१ निगृह्य च गजाः केचित्पार्श्व [illegible] र्भृशदारुणैः रथाश्वसादिभिस्तत्र संभिन्नान्यपतन्[illegible]वि ३२ सहयाः सादिनस्तत्र तोमरेण महामृधे भूमावमृद्नन्वेगेन सवर्मीणं पदातिनं ३३ तथा सावरणान्कांश्चित्तत्र तत्र विशांपते रथान्नागाः समासाद्य परिगृह्य च मारिष ३४ व्याक्षिपन्सहसा तत्र घोररूपे भयानके नाराचैर्निहताश्चापि गजाः पेतुर्महाबलाः ३५ पर्वतस्येव शिखरं वज्रभग्नं महीतले योधा योधान्समासाद्य मुष्टिभिर्व्यहनन्युधि ३६ केशेष्वन्योन्यमाक्षिप्य विक्षिप्य विभिदुश्च ह उद्यम्य च भुजानन्ये निक्षिप्य च महीतले ३७ पदा चोरः समाक्रम्य स्फुरतो पाहरं च्छिरः पततश्चापरे राजन्विजह्रारसिना शिरः जीवतश्च तथैवान्यः शस्त्रं काये न्यमज्जयत मुष्टियुद्धं महच्चासीद्योधानां तत्र भारत ३८ ॥

एम० ५२

४० ४१ ४२ ४३ ४८ ५० अष्टाविंशः अति १ ॥ ॥ ७

रत्ता२

तथाकेशग्रहश्चासीद्बाहुयुद्धंचभैरवं समासक्तस्यवामेनच्छविज्ञातस्तथापरः ४० जहारसमरेप्राणान्नानाशस्त्रैरनेकशःसंसक्तेषुच
योधेषु वर्त्तमानेचसंकुले ४१ कवंधान्युत्थितानिस्युःशतशोथसहस्रशः शोणितैःसिच्यमानानिशस्त्राणिकवचानिच ४२ महा
रागान्तु निबद्धाणीवचकाशिरे एवमेतन्महद्युद्धंदारुणंशस्त्रसंकुलं ४३ उन्मत्तगंगप्रतिमंशब्देनापूरयज्जगत नैवस्वेनपरेणाविवि
ज्ञायंतेशराहताः ४४ योद्धव्यमितियुध्यंतेराजानोजयगृद्धिनः स्वान्स्वान्युधिजघ्नुःपांडवैःसमागतान ४५ उभयोःसेनयोर्वीरैर्व्याकु
लेसमपद्यत रथैर्भग्नैर्महाराजवारणैश्चनिपातितैः ४६ हयैश्चपतितैस्तत्रनरैश्चविनिपातितैः अगम्यरूपापृथिवीक्षणेनसमपद्यत
४७ क्षणेनासीन्महीपालक्षतजौघप्रवर्त्तिनी पंचालानहनत्कर्णस्त्रिगर्त्तांश्चधनंजयः ४८ भीमसेनःकुरून्राजन्हस्त्य
नीकंचसर्वशः एवमेषक्षयोवृत्तःकुरुपांडवसेनयोः ४९ अपराह्णेगतेसूर्येकांक्षतांविपुलंयशः ५० इतिश्रीमहाभारतेकर्णपर्व
णि धृतराष्ट्रउवाच अतितीव्राणिदुःखानिदुःसहानिबहूनिच त्वत्तोहंसंजयाश्रौषंपुत्राणांदैवसंक्षयं १ ॥ ॥ ॥

२ विरथः कृतस्तस्य कृतं तत्र युद्धे धर्मपुत्रः कथं तं विरथं चक्रे तस्मात् तं चन्द्रपतिर्दुर्योधनः कथं अपध्यानं इति शेषः ३ ४ ५ ६ १० अपविध्यत्यक्त्वा १३

यथा त्वं मे कथयसे यथा युद्धमवर्तत न संति सूत कौरव्या इति मे निश्चिता मतिः २ दुर्योधनश्च विरथः कृतस्तत्र महारथः धर्मपुत्रः कथं
चक्रे तस्य वा नृपतिः कथं ३ अपराह्णे कथं युद्धमभवल्लोमहर्षणं तन्ममाचक्ष्व तत्त्वेन कुशलो ह्यसि संजय ४ संजय उवाच संस
क्तेषु तु सैन्येषु वध्यमानेषु भागशः रथमन्यं समास्थाय पुत्रस्तव विशांपते ५ क्रोधेन महता युक्तः सविषो भुजगो यथा दुर्योधनः समा
लक्ष्य धर्मराजं युधिष्ठिरं ६ प्रोवाच सूतं त्वरितो याहि याहीति भारत तत्र मां प्रापय क्षिप्रं सारथे यत्र पाण्डवः ७ ध्रियमाणातपत्रे
ण राजा राजनि दंशितः स सूतश्चोदितो राज्ञा राज्ञः स्यंदनमुत्तमं ८ युधिष्ठिरस्याभिमुखं प्रेषयामास संयुगे ततो युधिष्ठिरः क्रुद्धः
प्रभिन्न इव कुंजरः ९ सारथिं चोदयामास याहि यत्र सुयोधनः तौ समाजग्मतुर्वीरौ भ्रातरौ रथसत्तमौ १० समेत्य च महावीर्यौ सं
रब्धौ युद्धदुर्मदौ ववर्षतुर्महेष्वासौ शरैरन्योन्यमाहवे ११ ततो दुर्योधनो राजा धर्मशीलस्य मारिष शिलाशितेन भल्लेन धनुश्चिच्छेद
संयुगे १२ तं नामृष्यत संक्रुद्धो ह्यवमानं युधिष्ठिरः अपविध्य धनुश्छिन्नं क्रोधसंरक्तलोचनः १३ १३ ॥ ॥

१४ २३ सर्वपारसवीं तिरस्कारविनाशे च पुंसि पारसवः प्रमानितिमेदिनी २५ ॥ ॥ ॥ ॥ ॥ ॥७

स मर्त्ये कार्मुकमादाय धर्मपुत्रस्य संमुखे दुर्योधनस्य चिच्छेद ध्वजं कार्मुकमेव च १४ अथान्यद्धनुरादाय प्रविध्य च युधिष्ठिरं नावन्योन्यं स
संक्रुद्धौ शस्त्रवर्षाण्यमुंचतां १५ सिंहाविव सुसंरब्धौ परस्परजिगीषया तघ्नतुस्तौ रणेऽन्योन्यं नर्दमानौ वृषाविव १६ अन्तरं मार्गमाणौ
च चेरतुस्तौ महारथौ ततः पूर्णायतोत्सृष्टैः शरैस्तौ तु कृतव्रणौ १७ विरेजतुर्महाराज किंशुकाविव पुष्पितौ ततो राजन्प्रमुंचन्तौ सिंह
नादान्मुहुर्मुहुः १८ तलयोश्च तथा शब्दान्धनुषश्च महाहवे शंखशब्दांश्च वचक्रतुस्तौ नरेश्वरौ १९ अन्योन्यं तौ महाराज पीडयां
चक्रतुर्भृशं ततो युधिष्ठिरो राजा पुत्रं तव शरैस्त्रिभिः २० आजघानोरसि क्रुद्धो वज्रवेगैर्दुरासदैः प्रतिविव्याध तं तूर्णं तव पुत्रो महीपतिः २१
पंचभिर्निशितैर्बाणैः स्वर्णपुंखैः शिलाशितैः ततो दुर्योधनो राजा शक्तिं चिच्छेद भारत। २२ सर्वपारशवीं तीक्ष्णां महोल्काप्रतिमां तदा ता
मापतंतीं सहसा धर्मराजः शितैः शरैः २३ त्रिभिश्चिच्छेद सहसा तं च विव्याध पंचभिः निपपात ततः सा तु स्वर्णदण्डा महास्वना। २४ निप
तंती महोल्केव ददृशे शिखिसंनिभा शक्तिं विनिहतां दृष्ट्वा पुत्रस्तव विशांपते २५

छि२

२६ २७ २८ २९ ३० ३१ ३३ ३६ एकोनविंशः तत: १

नवभिर्निशितैस्तीक्ष्णैर्निजघानयुधिष्ठिरं सोतिविद्धो बलवता शत्रुणा शत्रुनाशनः २६ दुर्योधनं समुद्दिश्य बाणं जग्राह सत्वरः समा
धत्तवत्तं बाणं धनुर्मध्ये महाबलः २७ चिक्षेप च महाराज ततं क्रुद्धः पराक्रमी सतु बाणः समासाद्य तव पुत्रं महारथं २८ व्यामोह
यत राजानं धरणीं च जगाम ह ततो दुर्योधनः क्रुद्धो गदामुद्यम्य वेगितः २९ विधित्सुः कलहस्यान्तं धर्मराजमुपाद्रवत् तमुद्यतगदं
दृष्ट्वा दंडहस्तमिवान्तकं ३० धर्मराजो महाशक्तिं प्राहिणोत्तव सूनवे दीप्यमानां महावेगां महोल्कां ज्वलितामिव ३१ रथस्थ
: स तया विद्धो वर्म भित्त्वा स्तनान्तरे भृशं संविग्नहृदयः पपात च मुमोह च ३२ भीमस्तमाह वचनं प्रतिज्ञामनुचिंतयन् नायं वध्य
स्तव नृप इत्युक्तः स न्यवर्त्तत ३३ ततस्त्वरितमागम्य कृतवर्मा तवात्मजम् प्रत्यपद्यत राजानं निमग्नं व्यसनार्णवे ३४ गदामादा
य भीमोपि हेमपट्टपरिष्कृतां अभिदुद्राव वेगेन कृतवर्माणमाहवे ३५ एवं तदभवद्युद्धं त्वदीयानां परैः सह अपराह्णे महाराज कांक्ष
तां विजयं युधि ३६ इति श्रीमहाभारते कर्णपर्वणि संजय उवाच ततः कर्णं पुरस्कृत्य त्वदीया युद्धदुर्मदाः पुनरावृत्य संग्रामं चक्रुर्दे
वासुरोपमं १ । ॥ ॥ ॥

१२१

२ लवणजलः क्षारसमुद्रः ८ त्रिदशवरजोपमं विभुतुल्यं ९ ॥ ॥ ॥ ॥ राम

द्विरदनररथाश्वशंखशब्दैः परिहर्षिताविविधैश्च शस्त्रपातैः द्विरदरथपदातिसादिसंघाः परिकुपिताभिमुखाः प्रजघ्निरे ते १ शित
परस्वधप्रासपट्टिशैररिष्टिभिरनेकविधैश्च समर्दिताः द्विरदाश्वहयामहाहवेवरपुरुषैः पुरुषाश्ववाहनैः ३ कमलदिनकरेंदुसंनिभैः सितद
शनैः समुखाक्षिनासिकैः रुचिरमुकुटकुंडलैर्मही पुरुषशिरोभिरवास्तृताबभौ ४ परिघमुशलशक्तितोमरैर्नरवरभुशुंडिगदाशतैर्हताः
द्विरदनरहयाः सहस्रशो रुधिरनदीप्रवहास्तदाभवन् ५ प्रहतरथनराश्वकुंजरं प्रतिभयदर्शनमुल्बणाव्रणं तदहितहतमाबभौ बलं पितृप
तिराष्ट्रमिवप्रजाक्षये ६ अथ तव नरदेवसैनिकास्तव च सुताः सुरसूनुसंनिभाः अमितबलपुरः सरारणे कुरुवृषभाः शिनिपुत्रमभ्ययुः ७
तदतिरुधिरभीममाबभौ पुरुषवराश्वरथद्विपाकुलं लवणजलसमुद्धतस्वनं बलमसुरामरसैन्यसप्रभं ८ सुरपतिसमविक्रमस्ततस्त्रिदश
वरावरजोपमं युधि दिनकरकिरणप्रभैः पृषत्कैरवितनयोभ्यहनच्छिनिप्रवीरं ९ ॥ ॥ ॥

पि२

क०
५५

तमपि सरथवाजिसारथिं शिनिवृषभो विविधैः शरैस्त्वरन् भुजगविषसमप्रभैरगोपुरुषवरं समवारुणत्तदा १० शिनिवृषभशरप्रपीडितं तव सुहृद्दोवसुषेणानम्पुः तं तमतिरथोरथर्षभं द्विरदरथाश्वपदातिभिः सह ११ तदुदधिनिभमाद्रवद्बलं त्वरिततरैः समभिद्रुतं परैः द्रुपदसुतमुखैस्तदाभवत्पुरुषरथाश्वगजक्षयो महान् १२ अथ पुरुषवरौ कृताह्निकौ भवमभिपूज्य यथाविधि प्रभुं अरिवधकृतनिश्चयौ द्रुतं तव बलमर्ज्जुनकेशवौ सृतौ १३ जलदनिनदनिस्वनं रथं पवनविधूतपताककेतनं सितहयमुपयान्तमन्तिकं कृतमनसो ददृशुस्तदारयः १४ अथ विस्फार्य गांडीवं रथे नृत्यन्निवार्ज्जुनः शरसंबाधमकरोत्खं दिशः प्रदिशस्तथा १५ रथान्विमानप्रतिमान्मज्जयन्सायुधध्वजान् ससारथींस्तदा बाणैरभ्राणीवानिलोऽवधीत् १६ गजान्गजप्रयन्तॄंश्च वैजयन्त्यायुधध्वजान् सादिनोऽश्वांश्च पत्तींश्च शरैर्निन्ये यमक्षयं १७ ततस्तमन्तकमिव क्रुद्धमनिवार्यं महारथं दुर्योधनोऽभ्ययादेको निघ्नन्बाणैरजिह्मगैः १८ तस्यार्ज्जुनो धनुः सूतमश्वान्केतुं च सायकैः हत्वा सप्तभिरेकेन छत्रं चिच्छेद पत्रिणा १९ ॥

राम०
५५

नवमं च समाधाय पश्यस्त्वप्रणघातिने दुर्योधनो पेषुवरं तं द्रौणिः समपधाछिनत् २० ततो द्रौणेर्धनुश्छित्वा हत्वा चाश्वान् पांडवैः कृपस्यापि तदत्युग्रं धनु
श्चिच्छेद पांडवः २१ हार्दिक्यस्य धनुश्छित्वा ध्वजं चाश्वांस्तदावधीत् दुःशासनस्य धनुश्छित्वा राधेयमभ्ययात् २२ अथ सात्यकिमुत्सृज्य त्वरन् कर्णोऽर्जुनं
त्रिभिः विव्याध विव्याध विंशत्या कृष्णं पार्थं पुनः पुनः २३ न ग्लानिरासीत् कर्णस्य क्षिपतः सायकान् बहून् रणे विनिघ्नतः शत्रून् क्रुद्धस्येव शतक्रतोः २४ अ
थ सात्यकिरागत्य कर्णं विव्याध शितैः शरैः नवत्या नवभिश्चोग्रैः शतेन पुनरार्पयत् २५ ततः प्रवीराः पार्थानां सर्वे कर्णमपीडयन् युधामन्युः शिखंडी च द्रौ
पदेयाः प्रभद्रकाः २६ उत्तमौजा युयुत्सुश्च यमौ पार्षत एव च चेदिकारूषमत्स्यानां केकयानां च यद्बलं २७ चेकितानश्च बलवान् धर्मराजश्च सुव्रतः
एते रथाश्वद्विरदैः पत्तिभिश्चोग्रविक्रमैः २८ परिवार्य रणे कर्णं नानाशस्त्रैरवाकिरन् भाषंतो वाग्भिरुग्राभिः सर्वे कर्णवधे धृताः २९ तां शस्त्रवृष्टिं बहु
धा कर्णश्छित्वा शितैः शरैः अपोवाहास्त्रवीर्येण द्रुमं भंक्त्वेव मारुतः ३० रथिनः समहामात्रान् गजानश्वान् ससादिनः पत्तिव्रातांश्च संक्रुद्धो निघ्नन् कर्णो व्य
दृश्यत ३१ ॥ ॥ ॥ ॥

३२ निष्कैवल्यंनिष्ठितंकैवल्यंमरणंयस्मिन्तत्तथा ३६ ३७ ३८ ४० ४१ ४२

तह्यमानंपांडूनां बलंकर्णास्त्रतेजसा विशस्त्रपत्रदेहासमापन्नासीत्पराङ्मुखं ३२ अथकर्णास्त्रमस्त्रेणप्रतिहत्यार्ज्जुनःस्वयन्
दिशःखंचैवभूमिंचप्राछादयच्छरवृष्टिभिः ३३ मुसलानीवसंपेतुःपरिघाइवचेषवः शतघ्न्यइवचाप्यन्येवज्राण्युग्राणिचापरे ३४ तैर्व
ध्यमानंतत्सैन्यंसपत्त्यश्वरथद्विपं निमीलिताक्षमत्यर्थंबभ्रामचननादच ३५ निष्कैवल्यंतदायुद्धंप्रापुरश्वनरद्विपाः हन्यमानाः
शरैराजन्तोस्तदाभीताःप्रदुद्रुवुः ३६ त्वदीयानांतदायुद्धेसंसक्तानांजयैषिणां गिरिमस्तंसमासाद्यप्रत्यपद्यतभानुमान् ३७ तमसाच
महाराजरजसाचविशेषतः नकिंचित्प्रत्यपश्यामशुभंवायदिवाशुभं ३८ तेत्रस्यंतोमहेष्वासारात्रियुद्धस्यभारत अपयानंततश्चक्रुः
सहिताःसर्वयोधिभिः ३९ कौरवेषुप्रयातेषुतदाराजन्दिनक्षये जयंसुमनसःप्राप्यपार्थाःस्वशिविरंययुः ४० वादित्रशब्दैर्विविधैः
सिंहनादैःसगर्ज्जितैः परानुपहसंतश्चस्तुवंतश्चाच्युतार्ज्जुनौ ४१ कृतेवहारेतैर्वीरैःसैनिकाःसर्वएवते आशीर्वाचःपांडवेषुप्रायुंजं
तनरेश्वराः ४२ ४२ ॥

४३ त्रिंशः स्वेनछंदेन नरश्रेष्ठा आततायिनः शस्त्रपाणेः १ भद्रांस्त्वमद्रांश्चलिंगांश्च कारूदान् २ अरक्षत्पोषपाश्चापांमरतानर्दुर्योधनादीन् ४ तेऽस्मदीयान्जनिं
घाः तेशब्दसाम्यासाह्वाकात्रपमिदंतथाहुर्योधनोपिनिनिंघः अपितत विस्तृतः नाहंशंशत्रुंप्राप्यरव्यातिंगतइमर्षः ५ हताः ताडिताः महताः छिन्नावपवाः विध्वस्ताः

ततः कृतेव्यवहारे चप्रहृष्टास्तत्रपांडवाः निशायांशिविरंगत्वान्यवसंस्तेनरेश्वराः ४३ ततोरक्षः पिशाचाश्चश्वापदाश्चैवसंघशः जग्मुरायोधनंघो
रंरुद्रस्याक्रीडसंनिभं ४४ इतिकर्णपर्वणिप्रथमोयुद्धदिवसः धृतराष्ट्रउवाच स्वेनछंदेनतः सर्वानवधीदक्षमर्जुनः नह्यस्यसमरेमुच्ये
तंकोप्याततायिनः १ पार्थश्चैकोहरन्द्रोणमेकस्त्वाग्निमतर्पयत् एकश्चमांमहींजित्वाचक्रेबलिभृतोनृपान् २ एकोनिवातकवचानह
नद्दिव्यकार्मुकः एकः किरातरूपेणस्थितंसर्वमयोधयत् ३ एकोह्यरक्षन्भरतानेकोभवमतोषयत् तेनैकेनजिताः सर्वेमहीपालाउग्रतेजसो
४ नैतेनिंद्याः प्रशस्यास्तेयत्तेचक्रुर्ब्रवीहितत् ततोदुर्योधनः सूतपश्चात्किमकरोत्तदा ५ संजयउवाच हतप्रहतविध्वस्ताविवर्मायुधवाह
नाः दीनस्वराद्दूयमानामानिनः शत्रुनिर्जिताः ६ शिविरस्थाः पुनर्मंत्रंमंत्रयंतिस्मकौरवाः भग्नदंष्ट्राहतविषाः पादाक्रांताइवोरगाः ७
तानब्रवीत्ततः कर्णः क्रुद्धः सर्पइवश्वसन् करंकरेणनिष्पीड्यप्रेक्षमाणस्तवात्मजं ८ ॥ ॥ ॥ ॥ ॥ ॥ ॥

वाहनेभ्योधः पातिताः ६ ७ ८ ॥ ॥ राम राम ॥ ॥ ॥

९ सहसास्त्रकस्मात् ११ मनेस्थितेनेतिशेषः १२ प्रतीपकर्त्तारं शत्रूणां छेत्तारं प्रवीरं प्रकृष्टं वीरं १४ आत्ययिकेषु प्राणासंकटेषु १६ अप्यप

यत्नोद्दृष्टश्च दक्षे धृतिमानर्ज्जुनः सदा संबोधयति चाप्येनं यथाकालमधोक्षजः ९ सहसास्त्रविसर्गेणावपंनेनाथ वंचिताः भ्वेसहं
तस्य संकल्पं सर्वं हंतामहीपते १० एवमुक्तास्तथेत्युक्ता सोतजस्तेन पोत्तमान् तेनुज्ञातान्नृपाः सर्वे स्वानि वेश्मानि भेजिरे ११ सुरेवोपि
तास्तां रजनीं हृष्टा युद्धायनिर्ययुः तेपश्यन्विहितं व्यूहं धर्मराजेन दुर्जयं १२ प्रयत्नात्कुरुमुख्येन बृहस्पत्युशनो मते अथ प्रतीपकर्त्ता
रं त्वं वीरं प्रवीरहा १३ सस्मार वृषभस्कंधं कर्णं दुर्योधनस्तदा पुरंदरसमं युद्धे मरुद्गणसमं बले १४ कार्त्तवीर्यसमं वीर्ये कर्णं राज्ञोग
मन्मनः सर्वेषां चैव सैन्यानां कर्णमेवागमन्मनः १५ सूतपुत्रं महेष्वासं बंधुमात्ययिकेष्विव धृतराष्ट्र उवाच ततो दुर्योधनः सूत पश्चात्किम
करोत्तदा यद्वो गतमनसो मंदाः कर्णं वैकर्त्तनं प्रति १६ अप्यपश्यन्त राधेयं शीतार्त्ता इव भास्करं कृते वहारे सैन्यानां प्रवृत्ते च रणे पुनः १७ क
थं वैकर्त्तनः कर्णस्तत्रायुध्यत संजय कथं च पांडवाः सर्वे युयुधुस्तत्र सूतजं १८ कर्णो ह्येको महाबाहुर्हन्यात्पार्थान्स संजयान् कर्णस्य
भुजयो वीर्यं शक्र विष्णुसमं युधि १९ ॥

मनः कर्णाग्निमेरगामनः भाविनाशानवधानात् २० निष्ठाविपाकः २५ कर्णाग्निवनीतिमानिनितिमन्यतइतिपूर्वेणान्वयः २६ स्त्रीमध्यमिवगाहंते सेनांमध्यंतीत्यर्थः
२८ निमित्तानिधृताहीनिधर्मिष्ठानीतिसोपालेभंविरुद्धानीत्यर्थः २९ कार्यंराज्यलाभादिदूरप्राप्तंअत्यंतदुर्लभंयत्नमतः विज्ञानं पित्वपाप्रासविचारणांमुक्तापुक्त

तस्याथास्त्राणिघोराणिविक्रमस्यमहात्मनः कर्णामग्निमसंग्रामेमन्नोदुर्योधनोनृपः २० दुर्योधनंततोदृष्ट्वापांडवेननृशार्दितं पराक्रांतान्पां
डुसुतान्दृष्ट्वाचापिमहारथः २१ कर्णामग्निसंग्रामेमंदोदुर्योधनः पुनः जेतुमुत्सहतेपार्थान्सपुत्रान्सहकेशवान् २२ अहोवतमहद्दुःखंयत्रपां
डुसुतान्रणे नातरद्भसः कर्णोदैवंनूनंपरायणं २३ अहोद्यूतस्यनिष्ठेयंघोरासंप्रतिवर्त्तते अहोतीव्राणिदुःखानिदुर्योधनकृतानिसहे २४ सोढा
घोराणिबहुशः शल्यभूतानिसंजय सोवलंचतदातातनीतिमानितिमन्यते २५ कर्णाश्वरभेमानिमेराजातंचाप्यनुव्रतं यदेवंवर्त्तमानेषुमहायुद्धेषु
संजय २६ अभ्योपंनिहतान्पुत्रान्नित्यमेवचनिर्जितान् नपांडवानांसमरेकश्चिदस्तिनिवारकः २७ स्त्रीमध्यमिवगाहंतेदैवंतुबलवत्तरं संजय
उवाच राजन्सर्वनिमित्तानिधर्मिष्ठानिविचिंतय २८ अतिक्रांतंहियत्कार्यंपश्चाच्चिंतयतेनरः तच्चास्यनभवेत्कार्यंचिंतयाचविनिश्यति २९ तदिदं
तवकार्यंतुदूरप्राप्तंविजानतः नकृतंयत्त्वयापूर्वंप्राप्ताप्राप्तविचारणां ३० ॥

परीक्षणांनकृतामित्यन्वयः ३० ॥ ॥ ॥ राम ॥ ॥ ॥ ॥

३७ शक्रशक्तीनिरस्तस्य अर्ज्जुनवधे सामर्थ्याभावं द्योतयति ३८ श्रेयस्करं आत्मन आगाकरे ३९ वीर्यसमानमिति विशेषः कार्यस्य कर्त्तव्यस्य परकीयस्य भेदे विनाशेला

उक्तोसिवहुधाराजन्मायुध्यस्वेतिपांडवैः गृह्णीषेनचतन्मोहाद्वचनंचविशांपते ३१ त्वयापापानिघोराणिसमाचीर्णानिपांडुषु त्वत्कृतेवर्त्ततेघोरः
पार्थिवानांजनक्षयः ३२ तत्त्विदानीमतिक्रांतंमाशुचोभरतर्षभ प्राप्तुसर्वथापार्हत्नघोरंवैशसमच्युत ३३ प्रभातायांरजन्यांतुकर्णोराजानमभ्य
यात् समेत्यचमहावाहुर्दुर्योधनमथाब्रवीत् ३४ कर्णउवाच अद्यराजन्समेष्यामिपांडवेनयशस्विना विहनिष्यामितंवीरंसवामांनिहनिष्य
ति ३५ वहुत्वान्ममकार्याणांतथापार्थस्यभारत नाभूत्समागमोराजन्ममचैवार्ज्जुनस्यच ३६ इदंतुमेयथाप्रज्ञंशृणुवाक्यंविशांपते अनिह
त्यरणेपार्थंनाहमेष्यामिभारत ३७ हतप्रवीरेसैन्येस्मिन्मयिचावस्थितेयुधि अभियास्यतिमांपार्थःशक्रशक्तिविनाकृतं ३८ ततःश्रे
यस्करंयदत्रानिवोधजनेश्वर आयुधानांचमेवीर्यंदिव्यानामर्ज्जुनस्यच ३९ कार्यस्यमहतोभेदेलाघवेदूरपातने सौष्ठवेचास्त्रपातेनसव्यसा
चीनमत्समः ४० प्राणेशौर्येथविज्ञानेविक्रमेचापिभारत निमित्तज्ञानयोगेचसव्यसाचीनमत्समः ४१ ॥ ॥ ॥

घवेशीघ्रेसौष्ठवेकौशलेप्राणेशारीरवले शौर्यमानसवलेविज्ञानेअस्त्रशिक्षायांविक्रमेफलोपधानेऽस्त्राणांनिमित्तज्ञानयोगेलक्ष्यसंवंधावधारणे ४१ ॥

महामात्रं श्रेष्ठं विजयाख्यं नाम प्रसिद्धं ४२ सिद्धिर्मोक्षः आत्मवतो जितचित्तस्य ५० ५१ ५२ ५३ ॥

पु२

सर्वायुधमहामात्रं विजयं नाम तद्धनुः इंद्रार्थमभिकामेन निर्मितं विश्वकर्मणा ४२ येन दैत्यगणान्राजन्जितवान्वै शतक्रतुः
यस्य घोषेण दैत्यानां व्यामुह्यंत दिशो दश ४३ तद्भार्गवाय प्रायच्छच्छक्रः परमसंमतं तद्दिव्यं भार्गवो मह्यमदद्धनुरुत्तमं ४४ तेन
योत्स्ये महाबाहुमर्ज्जुनं जयतां वरं यथेंद्रः समरे सर्वान्दैतेयान्वै समागतान् ४५ धनुर्घोरं रामदत्तं गांडीवात्तद्विशिष्यते त्रिःसप्तकृ
त्वः पृथिवी धनुषा येन निर्ज्जिता ४६ धनुषो यस्य कर्म्माणि दिव्यानि प्राह भार्गवः तद्रामो ह्यददन्मह्यं येन योत्स्यामि पांडवं
४७ अद्य दुर्य्योधनाहं त्वां नंदयिष्ये सबांधवं निहत्य समरे वीरमर्ज्जुनं जयतां वरं ४८ सपर्वतवनद्वीपा हतवीरा ससागरा पुत्र
पौत्रप्रतिष्ठा ते भविष्यत्यद्य पार्थिव ४९ नाशक्यं विद्यते मेऽद्य त्वत्प्रियार्थं विशेषतः सम्यक्धर्मानुरक्तस्य सिद्धिरात्मवतो यथा
५० न हि मां समरे सोढुं स शक्तोऽग्निं तरुर्यथा अवश्यं तु मया वाच्यं येन हीनोऽस्मि फाल्गुनात् ५१ ज्या तस्य धनुषो दिव्या तथाक्ष
य्ये महेषुधी सारथिस्तस्य गोविंदो मम तादृङ्न विद्यते ५२ तस्य दिव्यं धनुः श्रेष्ठं गांडीवमजितं युधि विजयं च महद्दिव्यं ममापि
धनुरुत्तमं ५३

शल्यः कृष्णतुल्यः वाराणशकट्वङ्कलतया बाणानामक्षयत्वं ज्ञेयं एवंकृष्णस्त्वेनदिव्यास्त्रजयस्त्वाधाह अयमित्यादिना ६३ नेवेभेवेयंभेवेदितिपाठः ॥

तत्राहमधिकः पार्थाद्धनुषातेनपार्थिव येनचाप्यधिकोवीरः पांडवस्तंनिबोधमे ५४ यश्चग्राहस्त्वदाशार्हः सर्वलोकनमस्कृतः
अग्निदत्तश्चवैदिव्योरथः कांचनभूषणः ५५ अच्छेद्यः सर्वतोवीरवाजिनश्चमनोजवाः ध्वजश्चदिव्योद्युतिमान्वानरोविस्म
यंकरः ५६ कृष्णश्चस्रष्टाजगतोरथंतमभिरक्षति एतैर्द्रव्यैरहंहीनोयोद्धुमिच्छामिपांडवं ५७ अयंतुसदृशःशौरेः शल्यः समि
तिशोभनः सारथ्यंयदिमेकुर्याद्ध्रुवस्तेविजयोभवेत् ५८ तस्यमेसारथिः शल्योभवत्वसुकरःपरैः नाराचान्गार्ध्रपत्रांश्चश
कटानिवहंतुमे ५९ रथाश्चमुख्याराजेंद्रयुक्तावाजिभिरुत्तमैः आयांतुपश्चात्सततंमामेवभरतर्षभ ६० एवमभ्यधिकःपा
र्थाद्भविष्यामिगुणैरहं शल्योप्यभ्यधिकः कृष्णादर्जुनादपिचाप्यहं ६१ यथाश्वहृदयंवेददाशार्हःपरवीरहा तथाशल्यो
विजानीतेहयज्ञानंमहारथः ६२ बाहुवीर्येसमोनास्तिमद्रराजस्यकश्चन तथास्त्रैर्मत्समोनास्तिकश्चिदेवधनुर्धरः ६३ तथा
शल्यसमोनास्तिहयज्ञानेहिकश्चन सोयमभ्यधिकः कृष्णाद्भविष्यतिरथोमम ६४ एवंकृतेरथस्थोहंगुणैरभ्यधिकोर्जुनात्
॥ त भवेयंयुधिजेष्येयंचफाल्गुनंकुरुसत्तम ६५ ॥ ॥

मानादिकः ६४ ६५ ६५

७३ एकत्रिंशः पुत्रविनयेननत्वा प्रणयेनप्रकृष्टानन यानसुक्तियुक्तान्स्वर्णः १ २ ३

समनुघातुंनशक्ष्यंतिदेवाअपिसवासवाः एतत्कृतंमहाराजत्वयेच्छामिपरंतप ६६ क्रियतामेषकामोमेमिमावः कालोत्यगादयं
एवंकृतेकृतंसह्यंसर्वकामैर्भविष्यति ६७ ततोद्रक्ष्यसिसंग्रामेयत्करिष्यामिभारत सर्वथापांडवान्संख्येविजेष्येवैसमागता
न् ६८ नहिमेसमरेशक्ताः समनुयातुंसुरासुराः किमुपांडुसुताराजन्रणेमानुषयोनयः ६९ संजयउवाच एवमुक्तस्तवसुतः
कर्णेनाहवशोभिना संप्रहृष्टात्माततोराधेयमब्रवीत् ७० दुर्योधनउवाच एवमेतत्करिष्यामियथात्वंकर्णमन्यसे
सोपासंगारथाःसाश्वाःस्वनुयास्यंतिसंयुगे ७१ नाराचानार्धपत्रांश्चशकटानिवहंतुते अनुयास्यामकर्णत्वांवयंसर्वेचपा
र्थिवाः ७२ संजयउवाच । एवमुक्त्वामहाराजतवपुत्रःप्रतापवान् अभिगम्याब्रवीद्राजामद्रराजमिदंवचः ७३ इतिक
र्णपर्वणि संजयउवाच पुत्रस्तवमहाराजमद्रराजंमहारथं विनयेनोपसंगम्यप्रणयाद्वाक्यमब्रवीत् १ सत्यव्रतमहाभाग
द्विषतांतापवर्धन मद्रेश्वररणेशूरपरसैन्यभयंकर २ श्रुतवानसिकर्णस्यब्रुवतोवदतांवर यथानृपतिसिंहानांमध्येत्वांवर
येस्वयं ३ तस्त्वामप्रतिवीर्याघशत्रुपक्षक्षयावह मद्रेश्वरप्रयाचेहंशिरसाविनयेनच ४ तस्मात्पार्थविनाशार्थंहितार्थंमम
चैवहि सारथ्यंरथिनोग्रेश्वप्रणयात्कर्तुमर्हसि ५ त्वयियंतरिराधेयोविद्विषोमेविजेष्यते अभिषूणांहिकर्णस्यग्रहीतान्योन
विद्यते ६ ॥ मे१

क०
६०

सारथ्यंरथिनांश्रेष्ठप्रणयात्कर्तुमर्हसि ५ त्वयियंतरिराधेयोविद्विषोमेविजेष्यते अभीषूनांहिकर्णस्यग्रहीतान्योन हयपरश्मीनां ६ ७ ८ ९ १६

ऋतेहित्वांमहाभागवासु॰ देवसमंयुधि यथाहिसर्वथाकर्णस्यथाब्रह्मामहेश्वरं ७ यथाचसर्वथापत्सुवार्ष्णेयःपातिपांडवं तथामद्रे
श्वराद्यत्वंराधेयंप्रतिपालय ८ भीष्मोद्रोणःकृपःकर्णोभवान्भोजश्चवीर्यवान् शकुनिःसौवलोद्रौणिरहमेवचनोवलं ९ एवमे
षांकृतोभागोनवधापृथिवीपते नचभागोत्रभीष्मस्यद्रोणस्यचमहात्मनः १० ताभ्यामतीत्यतौभागौनिहताममशत्रवः वृद्धौ
हितौमहेष्वासौछलेननिहतौयुधि ११ कृत्वानसुकरंकर्मगतौस्वर्गमितोनघ तथान्येपुरुषव्याघ्राःपरैर्विनिहतायुधि १२
अस्मदीयाश्चबहवःस्वर्गायोपगतारणे त्यक्त्वाप्राणान्यथाशक्तिचेष्टांकृत्वाचपुष्कलां १३ तदिदंहतभूयिष्ठंवलंममनराधि
प एवमप्यल्पकैःपार्थैर्हतंकिमुतसोमकैः १४ वलवंतोमहात्मानःकौंतेयाःसत्यविक्रमाः वलंशेषंनहन्युर्मेयथातत्कुरुपार्थि
व १५ हतवीरमिदंसैन्यंपांडवैःसमरेविभो कर्णोह्येकोमहावाहुरस्मत्प्रियहितेरतः १६ ॥ ॥ ॥

॥ ॥

गम०
६०

श्रीगणपयनमः श्रीकृष्णायनमः ॥

१७ १८ १९ २० २७ आतुरायनं २८ २९

भवांस्त्वपुरुषव्याघ्रसर्वलोकमहारथः शल्यकर्णोर्जुनेनाद्ययोद्धुमिछतिसंयुगे १७ तस्मिन्नजयाशाविपुलामद्रराजनराधिप
तस्मान्नीयुग्रहवरोनान्योस्तिभुविकश्चन पार्थस्यसमरेकृष्णोयथाभीशुग्रहोवरः तथात्वमपिकर्णस्यरथेभीशुग्रहोभव १९ तेनयुक्तो
रणेपार्थोरक्ष्यमाणश्चपार्थिव यानिकर्माणिकुरुतेप्रत्यक्षाणितथैवतत २० पूर्वंनःसमरेह्येवमवधीदर्जुनोरिपून इदानींविक्रमोह्यस्य
कृष्णेनसहितस्यच २१ कृष्णेनसहितःपार्थोधार्तराष्ट्रीमहाचमू अहन्यहनिमद्रेशद्रावयन्दृश्यतेयुधि २२ भागोवशिष्टःकर्णस्यतवचैव
महाद्युते तंभागंसहकर्णेनयुगपन्नाशयाद्यहि २३ अरुणेनयथासार्द्धंतमःसूर्योव्यपोहति तथाकर्णेनसहितोजहिपार्थंमहाहवे
२४ उद्यंतौचयथासूर्यौबालसूर्यसमप्रभौ कर्णशल्यौरणेदृष्ट्वाविद्रवंतुमहारथाः २५ सूर्यारुणौयथादृष्ट्वातमोनश्यतिमारिष तथान
श्यंतुकौंतेयाःसपांचालाःससृंजयाः २६ रथिनांप्रवरःकर्णोयंतृणांप्रवरोभवान संयोगोयुवयोर्लोकेनाभून्नचभविष्यति २७ यथासर्वास्व
वस्थासुवार्ष्णेयःपातिपांडवं तथाभवान्परित्रातुकर्णंवैकर्तनंरणे २८ त्वयासारथिनाह्येषअप्रधृष्योभविष्यति देवतानामपिरणेसशक्राणां
महीपते किंपुनःपांडवेयानांमाविशंकीर्वचोमम २९

३० विस्रब्धंनिःशंकंयथासात्वया ३५ निधायन्वल्कतमपमानमितिशेषः प्रवर्तेतनत्क्त्वमितिशेषः ४० अधुरिनीचकर्मणि ४१

संजयउवाच दुर्योधनवचःश्रुत्वाशल्यः क्रोधसमन्वितः त्रिशिखांभ्रुकुटींकृत्वाधुन्वन्हस्तौपुनःपुनः ३० क्रोधरक्तेमहानेत्रेपरिवृत्यमहाभुजः कुलैश्वर्यश्रुतबलैर्दृप्तःशल्योब्रवीदिदं ३१ शल्यउवाच अवमन्यसिगांधारेध्रुवंचपरिशंकसे यन्मांब्रवीषिविस्रब्धंसारथ्यंक्रियतामिति ३२ अस्मत्तोभ्यधिकंकर्णंमन्यमानःप्रशंससि नचाहंयुधिराधेयंगणयेतुल्यमात्मनः ३३ आदिश्यतामभ्यधिकोममांशःपृथिवीपते तमहंसमरेजित्वागमिष्यामियथागतं ३४ अथवाप्येकएवाहंयोत्स्यामिकुरुनंदन पश्यवीर्यंममाद्यत्वंसंग्रामेदहतोरिपून ३५ यथाभिमानंकौरव्यनिधायहृदयेपुमान अस्मद्विधःप्रवर्तेततमामात्वमभिशंकिथाः युधिचाप्यवमानोमेनकर्तव्यःकथंचन प ३६ श्यपीनौममभुजौवज्रसंहननोपमौ ३७ धनुःपश्यचमेचित्रंशरांश्चाशीविषोपमान रथंपश्यचमेक्लृप्तंसदश्वैर्वातवेगितैः ३८ गदांचपश्यगांधारेहेमपट्टविभूषितां दारयेयंमहींक्रुद्धोविकिरेयंचपर्वतान ३९ शोषयेयंसमुद्रांश्चतेजसास्वेनपार्थिव तंमामेवंविधंराजन्समर्थमरिनिग्रहे ४० कस्माद्युनंक्षिसारथ्येनीचस्याधिरथेरणे नमामधुरिराजेंद्रनियोक्तुंत्वमिहार्हसि ४१ ॥ ॥

पापीयसः नीचयोनेः प्रेष्यत्वं दासत्वं कर्तुमिति शेषः ४१ वंशेश्वासायां अधरोत्तरं नीचोच्चैर्विपरीतम् द्रगांतेमहत्माये ४३

नहि पापीयसः श्रेयान्भूत्वा प्रेष्यत्वमुत्सहे योऽहमुपगतं प्रीत्या गरीयांसं वशे स्थितं ४२ वशे पापीयसो धत्ते तत्पापमधरोत्तरं ब्रह्मणा ब्राह्मणाः सृष्टा मुखात्क्षत्रं च बाहुतः ४३ ऊरुभ्यामसृजद्वैश्यान्शूद्रान्पद्भ्यामिति श्रुतिः तेभ्यो वर्णा विशेषाश्च प्रतिलोमानुलोमजाः ४४ अथान्योन्यसंयोगाच्चातुर्वर्ण्यस्य भारत गोप्तारः संग्रहीतारो दातारः क्षत्रियाः स्मृताः ४५ याजनाध्यापनैर्विप्रा विशुद्धैश्च प्रतिग्रहैः लोकस्यानुग्रहार्थाय स्थापिता ब्राह्मणा भुवि ४६ कृषिश्च पाशुपाल्यं च विशां दानं च धर्मतः ब्रह्मक्षत्रविशां शूद्रा विहिताः परिचारकाः ४७ ब्रह्मक्षत्रस्य विहिताः सूता वै परिचारकाः न क्षत्रियो वै सूतानां शृणुयाच्च कथंचन ४८ अहं मूर्धाभिषिक्तो हि राजर्षिकुलजो नृप महारथः समाख्यातः सेव्यः स्तुत्यश्च वंदिनां ४९ सोऽहमेतादृशो भूत्वा नेहारिबलसूदन सूतपुत्रस्य संग्रामे सारथ्यं कर्तुमुत्सहे ५० अवमानमहं प्राप्य न योत्स्यामि कथंचन आपृच्छे त्वाद्य गांधारे गमिष्यामि गृहाय वै ५१ संजय उवाच एवमुक्त्वा महाराज शल्यः समितिशोभनः उत्थाय प्रययौ तूर्णं राजमध्यादमर्षितः ५२ प्रणयाद्बहुमानाच्च तं निगृह्य सुतस्तव अब्रवीन्मधुरं वाक्यं सान्त्वा सर्वार्थसाधकं ५३ ॥ ॥ ॥

क० ६२

५४ ऋतमितिऋतमेव अयनं आश्रयो येषां ते ऋतायनाः तेषां गोत्रापत्यमार्तायनिस्त्वं ५६ मद्रेश्वरोऽस्य योनिर्देशजत्वाद्विशेषेण तद्गुणमिश्रत्वं सूच्यते ६२

यथाशल्यविजानीषेएवमेतदसंशयं अभिप्रायस्तुमेकश्चित्तन्निबोधजनेश्वर ५४ नकर्णोऽभ्यधिकस्त्वत्तोनशंकेत्वांचपार्थिव नहिमद्रे
श्वरोराजाकुर्याद्यदनृतंभवेत ५५ ऋतमेवहिपूर्वास्तेवदंतिपुरुषोत्तमाः तस्मादार्तायनिःप्रोक्तोभवानितिमतिर्मम ५६ शल्यभूतस्तुश
त्रूणांयस्मात्त्वंयुधिमानद तस्माच्छल्योहितेनामकथ्यतेपृथिवीतले ५७ यदेतद्व्याहृतंपूर्वंभवताभूरिदक्षिण तदेवकुरुधर्मज्ञम
दर्थंयद्यदुच्यसे ५८ नचत्वत्तोहिराधेयोनचाहमपिवीर्यवान् वृणेऽहंतेऽहयाग्र्याणांयंतारमिहसंयुगे ५९ मन्येचाप्यधिकंशल्य
गुणैःकर्णंधनंजयात् भवंतंवासुदेवाच्चलोकोयमितिमन्यते ६० कर्णोह्यभ्यधिकःपार्थादस्त्रैरेवनरर्षभ भवानभ्यधिकःकृष्णादश्व
ज्ञानेबलेतथा ६१ यथाश्वहृदयंवेदवासुदेवोमहामनाः द्विगुणंत्वंतथावेत्सिमद्रराजेश्वरात्मज ६२ शल्यउवाच यन्मांब्रवीषिगांधा
रेमध्येसैन्यस्यकौरव विशिष्टंदेवकीपुत्रात्प्रीतिमानस्म्यहंत्वयि ६३ एषसारथ्यमातिष्ठेराधेयस्ययशस्विनः युध्यतःपांडवाग्र्येणयथात्वं
वीरमन्यसे ६४ समयश्चहिमेवीरकश्चिद्वैकर्तनंप्रति उत्सृजेयंयथाश्रद्धमहंवाचोस्यसंनिधौ ६५ ॥ ॥

वाचँ उत्सृजेयं ताः अनेन क्षंतव्या इति भावः ६३ ६४ ६५ ॥ ॥ ॥ ॥ ॥

राम० ६२

द्वात्रिंशः भूयः १ पितुः पुरतः मह्यंमत्तः ३ तारकामयः तारकासुरस्यैव आमयो रोगवत्तराम वहेतुर्यत्र स तथा ४ दमेन बाह्येन्द्रियजयेन तपसा चित्त

संजयउवाच तथोक्तिराजन्पुत्रस्तेसहकर्णेनभारत अब्रवीन्मद्रराजस्तमंतंभरतसत्तम ६६ इतिश्रीकर्णपर्वणि दुर्योधनउवाच भूयए
वतुमद्रेशयत्तेवक्ष्यामितच्छृणु यथापुरावृत्तमिदंयुद्धेदेवासुरेविभो १ यदुक्तवान्पितुर्मह्यंमार्कंडेयोमहानृषिः तदशेषेणब्रुवतोममरा
जर्षिसत्तम २ निबोधमनसाचात्रनतेकार्याविचारणा देवानामसुराणांचपरस्परजिगीषया ३ बभूवप्रथमोराजन्संग्रामस्तारकाम
यः निर्जिताश्चतदादैत्यादैवतैरितिनःश्रुतं ४ निर्जितेषुचदैत्येषुतारकस्यसुतास्त्रयः ताराक्षःकमलाक्षश्चविद्युन्मालीचपार्थिव
५ तपउग्रंसमास्थायनियमेपरमेस्थिताः तपसाकर्षयामासुर्देहान्स्वान्शत्रुतापन ६ दमेनतपसाचैवनियमेनसमाधिना
तेषांपितामहःप्रीतोवरदःप्रददौवरं ७ अवध्यत्वंचतेराजन्सर्वभूतस्यसर्वदा सहितावरयामासुःसर्वलोकपितामहं ८ तानब्रवी
त्तदादेवोलोकानांप्रभुरीश्वरः नास्तिसर्वामरत्वंवैनिवर्तध्वमितोसुराः ९ अन्यंवरंवृणीध्वंवैयादृशंसंप्ररोचते ततस्तेसहिताराजन्सं
प्रधार्यासकृद्बहु १०

स्यैकाग्र्येण नियमेनशौचादिना समाधिना ध्यानेन ५ ६ ७ ८ ९ १० ॥ ॥ ॥

क०
६३

११ चक्रस्थं आयसावशं पथ्येषु संचारीत्यर्थः चक्रस्थमिति तृतीयमिति पाठः प्रामादिकः १९ २० २२

छ४

सर्वलोकेश्वरं वाक्यं प्रणम्येदमथाब्रुवन् अस्माकं त्ववरं देव संप्रयच्छ पितामह ११ वयं पुराणि त्रीण्येव समास्थाय महीमिमां विचरिष्या
म लोकेस्मिंस्त्वत्प्रसादपुरस्कृताः १२ ततो वर्षसहस्रे तु समेष्यामः परस्परं एकीभावं गमिष्यंति पुराण्येतानि चानघ १३ समागतानि चैता
नि यो हन्याद्भगवंस्तदा एकेषुणा देववरः स नो मृत्युर्भविष्यति १४ एवमस्त्विति तान्देवः प्रत्युक्त्वा प्राविशद्दिवं ते तु लब्धवराः प्री
ताः संप्रधार्य परस्परं १५ पुरत्रयविसृष्ट्यर्थं मयं वव्रुर्महासुरं विश्वकर्माणमजरं दैत्यदानवपूजितं १६ ततो मयः स्वतपसा चक्रे धी
मान्पुराणि च त्रीणि कांचनमेकं वै रौप्यं कार्ष्णायसं तथा १७ कांचनं दिवि तत्रासीदंतरिक्षे च राजतं आयसं चाभवद्भौमं चक्रस्थं पृथिवी
पते १८ एकैकं योजनशतं विस्तारायामतः समं गृहाट्टालकसंयुक्तं बृहत्प्राकारतोरणं १९ गृहप्रवरसंबाधमसंबाधमहापथं प्रासा
दैर्विविधैश्चापि द्वारैश्चैवोपशोभितं २० पुरेषु चाभवन्राजन्राजानो वै पृथक्पृथक् कांचनं तारकाक्षस्य चित्रमासीन्महात्म
नः २१ राजतं कमलाक्षस्य विद्युन्मालिन आयसं त्रयस्ते दैत्यराजानस्त्रींल्लोकानस्त्रतेजसा २२ ॥ ॥

राम०
६३

स्पु१

श्राक्रमतो[illegible]दूचुस्त्वकस्त्वनामप्रजापतिः तेषांदानवमुख्यानांप्रपुतान्यर्वुदानिच २३ कोधश्चाप्रतिवीराणांसमाजग्मुस्ततस्ततः मां
साशिनः सुतरांश्चसुरैर्विनिकृताःपुरा महदैश्वर्यमिच्छन्तस्त्रिपुरंदुर्गमाश्रिताः सर्वेषांचपुनस्तेषांसर्वेषांगवहोमयः २५ तमाश्रित्यहि
तेसर्वेवर्त्तयंतोकुतोभयाः योहियन्मनसाकामंदध्यौत्रिपुरसंश्रयः २६ तस्मैकामंमयस्तंतंविदधेमाययातदा तारकाक्षसुतोवीरोह
रिर्नाममहाबलः २७ तपस्तेपेपरमकंयेनातुष्यत्पितामहः संतुष्टमब्रवीद्देवंवापीभवतुनःपुरे २८ शस्त्रैर्विनिहतायत्रक्षिप्तास्सुवि
लवत्तराः स्युतुल्यावरंवीरस्तारकाक्षसुतोहरिः २९ ससृजेतत्रवापींतांमृतानांजीवनीप्रभो येनरूपेणादैत्यस्तुयेनवेषेणचै
वह ३० मृतस्तस्यांपरिक्षिप्तस्ताद्दृशेनैवजज्ञिवान् तांप्राप्यतेपुनस्तांस्तुलोकान्सर्वान्ववाधिरे ३१ महतातपसासिद्धाः सुराणां
भयवर्द्धनाः नतेषामभवद्राजन्क्षयोयुद्धेकदाचन ३२ ततस्तेलोभमोहाभ्यामभिभूताविचेतसः निर्ह्रीकाःसंस्थिताःसर्वेस्थापि
ताःसमलुंपत ३३ विद्राव्यसगणान्देवांस्तत्रतत्रतदातदा विचेरुःस्वेनकामेनवरदानेनदर्पिताः ३४ ॥ ॥

ग१

क० ६४

३५ ३६ ३७ ३८ ३९ ४० ४१ ४२ ४३ ४४ आदित्यादेवाः ४५ ४६ ॥ ॥ ॥

देवोद्यानानिसर्वाणिप्रियाणिचदिवौकसां ऋषीणामाश्रमान्पुण्यानरम्यानजनपदांस्तथा ३५ यतोदर्पेनमर्षीदानवा दुष्टचारिणः पीड्यमानेषुलोकेषुततःशक्रोमरुद्वृतः ३६ पुराणायोधयांचक्रेवज्रपातैःसमंततः नाशकत्तानभेद्यानिम दाभेत्तुंपुरंदरः ३७ पुराणिवरदत्तानिधात्रातेननराधिप तदाभीतःसुरपतिर्मुक्त्वातानिपुराणपथ ३८ तैरेवविबुधैःसार्द्धंपितामहमरिंदम जगामाथतदाख्यातुंविप्रकारंसुरेतरैः ३९ तेतत्त्वंसर्वमाख्यायशिरोभिःसंप्रणम्यच वधोपायमपृच्छंतभगवंतंपितामहं ४० श्रुत्वातंभगवान्देवोदेवानिदमुवाचह ममापिसोपराध्नोतियोयुष्माकमसौम्यकृत ४१ असुराहिदुरात्मानःसर्वएवसुरद्विषः अपराध्यंतिसततंयेयुष्मान्पीडयंत्युत ४२ अहंहितुल्यःसर्वेषांभूतानांनात्रसंशयः अधार्मिकास्तुहंतव्याइतिमेव्रतमाहितं ४३ एकेषुणाविभेद्यानितानिदुर्गाणिनान्यथा नचस्थाणुमृतेशक्तोभेत्तुमेकेषुणापुरः ४४ तेयूयंस्थाणुमीशानंजिष्णुमक्लिष्टकारिणं योद्धारंवृणुतादित्याःसतान्हंतासुरेतरान् ४५ इतितस्यवचःश्रुत्वादेवाःशक्रपुरोगमाः ब्रह्माणमग्रतःकृत्वावृषांकंशरणंययुः ४६

राम० ६४

उग्राभिः रुद्राणीभिः आहृत्यापूर्णं आत्मना अनौपाधिकेन ४९ आत्मनः मनसः योगं सर्ववृत्तिनिरोधं सांख्यं सम्यक्ख्यापनं आत्मनोऽष्टवर्गात्पृथग्
ग्रहणं आत्मनः वशे आज्ञायां ५० भगवंतं षड्विधैश्वर्यवंतं एकमपि तं तं यथायथा पाप्तमित्यर्थः इति श्रुतेर्यथा भावनं शिवविष्णुरुद्रादिविशेषणानानात्वं

ततो नियमम् आस्थाय प्रणम्य ब्रह्मशाश्वतं ऋषिभिः सहधर्मज्ञाः सर्वे सर्वात्मना गताः ४७ तुष्टुवुर्वाग्भिरुग्राभिर्यथा भगवन्तम्
सर्वात्मानं महात्मानं येनाप्तं सर्वमात्मना ४८ तयोर्विशेषैर्विविधैर्योगयोर्वेद चात्मनः यः सांख्यमात्मनो वेत्ति यस्य चात्मा वशे सदा
४९ ततस्ते ददृशुर्देवं तेजोराशिसमाकृतिं अनन्तसदृशं लोके भगवन्तमकल्मषं ५० एकं च भगवन्तं ते नानारूपमकल्पयन्
आत्मनः प्रतिरूपाणि रूपाण्यथ महात्मनि ५१ परस्परस्य चापश्यन्सर्वे परमविस्मिताः सर्वभूतमयं देवं ... तमजं जगतः पतिं
५२ देवा ब्रह्मर्षयश्चैव शिरोभिर्धरणीं गताः तान्स्वस्तिवादेनाभ्यर्च्य समुत्थाप्य च शंकरः ५३ ब्रूत ब्रूतेति भगवान्स्मयमानोऽभ्यभाषत
त्र्यंबकेणाभ्यनुज्ञातास्ततस्ते स्वस्थचेतसः ५४ नमो नमो नमस्तेऽस्तु प्रभो इत्यब्रुवन्वचः नमो देवाधिदेवाय धन्विने वन
मालिने ५५ प्रजापतिमखघ्नाय प्रजापतिभिरीड्यसे नमस्तुताय स्तुत्याय स्तूयमानाय वर्त्मने ५६ ॥ ॥ ॥

अकल्पयन् आत्मनः चित्तस्य प्रतिरूपाणि संकल्पानुसा[ri]णि प्रतिबिंबवा परस्परसंन्विति ईश्वरस्वरूपे सर्वे आत्मानं परांश्चापश्यन्निति सार्ध
श्लोक ४५५ ईज्यते ईड्यमानाय ५६

क्षपनायहिंस्रायपशुजस्त्वदृष्टैः कामैः प्रपन्नस्त्वं तु व्यपगच्छतु ६३ त्रयस्त्रिंशःपिरं अस्यैवइतिच्छेदः १ वर्धेनिनि ४

विलोहितायरुद्रायनीलग्रीवायशूलिने अमोघायमृगाक्षायप्रवरायक्षपणायच ५७ अर्हायचैवशुद्धायक्षयायक्षपणायच
दुर्वारणायकाम्यायब्रह्मणेब्रह्मचारिणे ५८ ईशानायाप्रमेयायनियंत्रेचर्मवाससे तपोरतायपिंगायव्रतिनेकृत्तिवाससे ५९
कुमारपित्रेत्र्यक्षायप्रवरायुधयोधिने प्रपन्नार्तिविनाशायब्रह्मद्विट्संघघातिने ६० वनस्पतीनांपतयेनराणांपतयेनमः ग
वांचपतयेनित्यंयज्ञानांपतयेनमः ६१ नमोस्तुतेससैन्यायत्र्यंबकायामितौजसे मनोवाक्कर्मभिर्देवत्वांप्रपन्नान्भजस्वनः
ततः प्रसन्नोभगवान्स्वागतेनाभिनंद्यच प्रोवाचव्येतुवस्त्रासोब्रूतकिंकरवाणिवः ६३ इतिकर्णपर्वणि दुर्योधनउवाच पितृदेवर्षि
संघेभ्योभयेदत्तेमहात्मना सत्कृत्यशंकरंप्राहब्रह्मालोकहितंवचः १ तवातिसर्गाद्देवेशप्राजापत्यमिदंपदं मयाधितिष्ठतादत्तो
दानवेभ्योमहान्वरः २ तानतिक्रांतमर्यादान्नान्यःसंहर्तुमर्हति त्वामृतेभूतभव्येशत्वंह्येषांप्रत्यरिर्वध ३ सत्वंदेवप्रपन्नानांयाचतांदिवौ
कसां कुरुप्रसादंदेवेशदानवाञ्जहिशंकर ४ ॥

तांच २

एवंतत्र्यवर्धततेप्रसिद्धावयंशरणंगताः त्वामितिशेषः ५ संहताः एकीभूताः सूपं ७ तेषांतेजोस्मत्तेजस्तोद्विगुणंदृष्टमेवेत्यर्थः ११ अर्द्धतेजसः १२ म

त्वत्प्रसादाज्जगत्सर्वमसुरवैर्मेधतमानद शरणयस्त्वंहिलोकेशतेवयंशरणंगताः ५ स्छारगुरुवाच हंतव्याःशत्रवःसर्वेयुष्माकमितिमे मतिः नत्वकउत्सहेहंतुंबलस्छाहिसुरद्विषः ६ तेयूयंसहिताःसर्वेमदीयेनार्द्धतेजसा जयध्वंयुधितान्शत्रून्संयत्ताहिमहाबलाः ७ देवाऊचुः अस्मत्तेजोबलंयावत्तावद्द्विगुणमाहवे तेषामितिहतस्मामोदृष्टतेजोबलाहिते ८ श्रीभगवानुवाच वध्यास्तेसर्वेतःपापायेयुष्मास्वपराधिनः ममतेजोबलार्द्धेनसर्वान्निघ्नतशात्रवान् ९ देवाऊचुः विभर्त्तुंभवतोर्द्धंतुनशक्ष्यामोमहेश्वर सर्वेषांनोबलार्द्धेनत्वमेवजहिशात्रवान् १० श्रीभगवानुवाच यदिशक्तिर्नवःकाचिद्विभर्त्तुंमामकंबलं अहमेतान्हनिष्यामियुष्मत्तेजोर्द्धवृंहितः ११ ततस्तथेतिदेवेशस्तैरुक्तोराजसत्तम अर्द्धमादायसर्वेषांतेजसाभ्यधिकोभवत् १२ सतुदेवोबलेनासीत्सर्वेभ्योबलवत्तरः महादेवइतिख्यातस्ततःप्रभृतिशंकरः १३ ततोब्रवीन्महादेवोधनुर्बाणधरोप्यहं हनिष्यामिरथेनाजौतानितृपन्वादिवौकसः १४ तेयूयंमेरथंचैवधनुर्बाणंतथैवच पश्यध्वंयावदद्यैतान्पातयामिमहीतले १५ ॥ ॥

हत्वासर्वान्तिशापिनाबलेनदीव्यतिप्रकाशतेइतिमहादेवः १४ १५ ॥ ॥ ॥ ॥

मूर्त्तीः तेजोमात्राः समाधाय एकीकृत्य १६ विहितं अपूर्वं स्थापितं उपमानं सैव विश्वकर्मणा कृतं १७ अंगं अंगाकारं वटिकापुत्रकं कांडं भल्लः शल्यः कुड्मलस्तस्या
ग्रभागस्तस्मिन्सतीक्ष्णाभागः सोमः शल्योविसृष्टेजनमितिश्रुतेः १९ अक्षश्चक्राधारदंडः जंघा अक्षाधारकाष्ठं महानदी गंगा ईषायुगाक्षसंधानत्रिवेणुगामपि
काष्ठं युगः धुर्ययोजनदंडः २० कूवरः युगंधरः २१ अपस्करं पश्चात्काष्ठं भुजगोत्तमः शेषः अधिष्ठाने चक्रे चक्राधारौ अधिष्ठानं पुरे चक्रे प्रभावे ध्यास

देवा ऊचुः मूर्त्तीः सर्वाः समाधाय त्रैलोक्यस्य ततस्ततः रथं ते कल्पयिष्यामो देवेश्वरस्य वर्चसं १६ तेपे ववुध्या विहितं विश्वकर्मकृतं शुभं ततो
विबुधशार्दूलास्तं रथं समकल्पयन् १७ विसृष्टो सोमं कृत्वा शंचंतस्मै पुंसमकल्पयन् अंगमग्निर्वभूवास्य भल्लः सोमो विशांपते १८ कुड्मल
स्त्वाभवद्विष्णुस्तस्मिन्त्रिपुवरे तदा रथं वसुंधरां देवीं विशालपुरमालिनीं १९ सपर्वतवनद्वीपां चक्रुर्भूतधरां तदा मंदरः पर्वतस्त्वाक्ष
जंघा तस्य महानदी २० दिशश्च प्रदिशश्चैव परिवारो रथस्य तु ईषा नक्षत्रवंशश्च युगः कृतयुगोभवत् २१ कूवरश्च रथस्यासीद्वा
सुकिर्भुजगोत्तमः अपस्करमधिष्ठाने हिमवान्विंध्य पर्वतः उदयास्तावधिष्ठाने गिरी चक्रुः सुरोत्तमाः २२ समुद्रमक्षमसृजन्दान
वालयमुत्तमं सप्तर्षिमंडलं चैव रथस्यासीत्परिष्कारः २३ ॥ ॥

नेमिं चेति मेदिनी २२ अक्षं बंधनपाशसमुदायः समुद्रः जलमयत्वेनचिक्कणत्वात् परिष्कारं चक्ररक्षादि सिंधुर्गमनाख्यानदीति तस्मिन्त्रिवेणुस्था
नीयाभिः सहितमाकाशं धुरं धूर्भागः उपस्करः वेधादि सामग्री २३

स्तु १ — मूर

अनुकर्षिरथाधस्थितदारुबन्धसंरथगुप्तिः २५ धर्मादयस्त्रिवर्गं सदृशावंधुरं रथतुल्यं २६ पूर्वहिमवद्विंध्यपर्वतौ चक्राले नौ क्रौ अत्र सूर्यचंद्रौ चक्राले नदृष्टावतस्त्वतुम्बकोर थहतिगम्यत अतः समुद्रौ पक्षौ तरोमतिक्रजुरेवाघः पूर्वः पक्षः पूर्वीगंगरात्रिः अपरः पक्षो परो अहः २८ घांद्विनौ युगे

गंगा सरस्वती सिंधुर्धुरमाकाशमेवच उपस्करा रथस्यासन्नाग्यः सर्वाश्च निम्नगाः २४ अहोरात्राः कलाश्चैव काष्ठाश्च ऋतवस्तथा अनु
कर्षं ग्रहादीप्ता वरूथं चापितारकाः २५ धर्मार्थकाम संयुक्तं त्रिवेणुं दारुवंधनं ओषधीवीरुधश्चैव घंटाः पुष्पफलोपगाः २६ सूर्या
चंद्रमसौ कृत्वा चक्रे रथवरोत्तमे पक्षौ पूर्वापरौ तत्र कृते रात्र्यहनी शुभे २७ दशनागपतीनीषां धृतराष्ट्रमुखांस्तदा योक्त्राणि च
कृतनागांश्च निश्वसंतो महोरगान् २८ युगं युगचर्माणि संवर्तकवलाहकान् कालपृष्ठश्च नहुषः कर्कोटकधनंजयौ २९ ॥
इतरे चाभवन्नागा हयानां वालवंधनाः दिशश्च प्रदिशश्चैव रश्मयो रथवाजिनां ३० संध्यां धृतिं च मेधां च स्थितिं संनतिमेव च ग्रह
नक्षत्रताराभिश्चर्म चित्रं नभस्तले ३१ सुरांबुभेतवित्तानां पतीन्लोकेश्वरान्हयान् सिनीवालीमनुमतिं कुहूं राकां च सुव्रतां ३२ ॥

गंधं चतुष्चक्रलाद्यस्य संवर्तकवलाहकान् युगचर्माणि यु [illegible] धयुगपोर्न्तरस्थानिकशिपूनि २९ वालवंध नागाश्चके सरबंधनाः ३० नभस्त
ले चर्म रथस्य वाह्यमावरणं तच्च संध्यादिक्षिप्तग्रहादिभिश्च चित्रं ३१ सिनीवाली पूर्वमावास्या अनुमतिः पूर्वपौर्णमासी कुहूः उत्तरामावास्या राका उत्तरा पौर्णिमा

गेस्कं २ — का° १ पो° १

न१

रोहकान्सिनीवाल्याधिष्ठानन्दिनिमित्राद्दीकंटकानश्रराकीलकानधर्मीदपस्तत्रकंटकेषुरशमयः ३३ मनः अधिष्ठानेरथाधारभूः मनोमयेरथस्यपूर्व

योऽश्वराणिचक्रुर्विहानारोहकांस्तत्रकंटकान् धर्मस्सत्यंतयोर्यस्तुविहितास्तत्रराशमयः अधिष्ठानेमनस्त्वासीत्परिरण्यासरस्वती नानावर्णा
श्चचित्रास्तुपताकाःपवनेरिताः ३४ विद्युदिंद्रधनुर्नद्धरथंदीप्तंव्यदीपयन् वषट्कारःप्रतोदोऽभूद्गायत्रीशीर्षवंधना ३५ योयज्ञेविहि
तः पूर्वमीशानस्यमहात्मनः संवत्सरोधनुस्तद्वैसावित्रीज्यामहास्वना ३६ दिव्यं चवर्मविहितंमहार्हंरत्नभूषितं अभेद्यंविरज
स्कंवैकालचक्रबहिष्कृतं ३७ ध्वजयष्टिरभून्मेरुः श्रीमान्कनकपर्वतः पताकास्त्वाभवन्मेघास्तडिद्भिःसमलंकृताः ३८ रेजुरु
ध्वर्युमध्यस्थाज्वलंतइवपावकाः क्लृप्तंतुतंरथंदृष्ट्वाविस्मितादेवताभवन् ३९ सर्वलोकस्यतेजांसिदृष्ट्वैकस्थानिमारिष
युक्तंनिवेदयामासुर्देवास्तस्मैमहात्मने ४० एवंतस्मिन्महाराजकल्पितेरथसत्तमे देवैर्मनुजशार्दूलद्विषतामभिमर्दने ॥
४१ स्वान्यायुधानिमुख्यानिन्यदधाच्छंकरोरथे ध्वजयष्टिंवियत्कृत्वास्थापयामासगोवृषं ४२ ब्रह्मदंडःकालदंडोरुद्रदंड
स्तथाज्वरः परिस्कंदारथस्यासन्सर्वतोदिशमुद्यताः ४३ ॥

परिरण्याप्रचारमार्गः सरस्वतीवाग्देवीमनःकल्पितःशब्दमात्रशरीरइत्यर्थः ३८ अध्वर्युरग्निन्वित्विजांमध्येस्थिताःपावकाःधिष्ण्यगाः ४१ गोवृषंध्व

४४ छायांसर्वौकांसावित्रीशब्दब्रह्मरूपत्वादात्मनस्तुल्यां ४९ धनुर्ज्याकालरात्रिरूपात्मस्याः संस्पर्शेनवि[illegible]नेमहिरेनेसुरः ५० तिग्ममन्युनीक्ष्णा

अथर्वांगिरसावाणांचक्रारक्षोमहात्मनः ऋग्वेदः सामवेदश्चपुराणंचपुरःसराः ४४ इतिहासयजुर्वेदौपृष्ठरक्षौबभूवतुः दि
व्यावाचश्चविद्याश्चपरिपार्श्वचरास्थिताः ४५ स्तोत्रादयश्चराजेंद्रवषट्कारस्तथैवच ओंकारश्चमुखराजन्नतिशोभाकरोभव
त ४६ विचित्रमृतुभिः षड्भिः कृत्वासंवत्सरंधनुः छायामेवात्मनश्चक्रेधनुर्ज्यामक्षयांरणे ४७ कालोहिभगवान्रुद्रस्तस्यसं
वत्सरोधनुः तस्माद्रौद्रीकालरात्रिर्ज्याकृताधनुषोजरा ४८ इषुश्चाप्यभवद्विष्णुर्ज्वलनः सोमएवच अग्नीषोमौजगत्कृ
त्स्नंवैष्णवंचोच्यतेजगत् ४९ विष्णुश्चात्माभगवतोभवस्यामिततेजसः तस्माद्धनुर्ज्यासंस्पर्शनविषेहुर्हरस्यते ५० त
स्मिन्शरेतिग्ममन्युमुमोचासह्यमीश्वरः भृग्वंगिरामन्युभवंक्रोधाग्निमतिदुःसहं ५१ सनीललोहितोधूम्रः कृत्तिवासाभयं
करः आदित्यायुतसंकाशस्तेजोज्वालावृतोज्वलन् ५२ दुश्चावच्यावनोजेतांहताब्रह्मद्विषांहरः नित्यंत्राताचहंताचधर्माधर्मा
श्रितान्रणान् ५३ प्रमाथिभिर्भीमबलैर्भीमरूपैर्मनोजवैः विभातिभगवान्स्थाणुस्तैरेवात्मगुणोर्वृतः ५४ ॥

संकल्पं ५१ अभयमितिच्छिदः संधिरार्षः ५३ तैः रूपादिभिस्तैः आत्मगुणैः आत्मनोमोक्तुर्गुणाभूतैर्भैर्गैपैः ५४ ॥ ॥ ॥

क० ६८

वाणमादाय संस्थितं तं दृष्ट्वा देवास्तस्मात्कूलेजपार्श्वहं स्वसनं कल्पयांचक्रिरे इत्यन्वयः ५५ ५८ ६० ६६

तस्यांगानि समाश्रित्य संस्थितं विश्वमिदं जगत् जंगमाजंगमं राजन्मुमुक्षुभिर्दुर्दर्शनं ५५ दृष्ट्वा तु तं रथं युक्तं कवची सशरासनी वाणमादा
पतेदिव्यं सोमविष्णुग्निसंभवं ५६ तस्य राजंस्तदा देवाः कल्पयांचक्रिरे प्रभो पुराण गंधवहं राजन्स्वसनं देवसत्तम ५७ तमास्थाय म
हादेवस्त्रासयन्दैवतान्यपि आरुरोह तदा यत्नः कंपयन्निव मेदिनी ५८ तमारुरुक्षुं देवेशं तुष्टुवुः परमर्षयः गंधर्वा देवसंघाश्च
तथैवाप्सरसां गणाः ५९ स शोभमानो वरदः खड्गी वाणी शरासनी हसन्निवाब्रवीद्देवान्सारथिः को भविष्यति ६० तमब्रुवन्दे
व[illegible] गणा यं भवान्संनियोक्ष्यते स भवि[illegible]ति देवेश सारथिस्ते न संशयः ६१ तानब्रवीत्पुनर्देवो मत्तः श्रेष्ठतरो हि यः तं सा
रथिं कुरुध्वं मे स्वयं संचिंत्य मा चिरं ६२ एतच्छ्रुत्वा ततो देवा वाक्यमुक्तं महात्मना गत्वा पितामहं देवाः प्रसाद्येदं वचोऽब्रुवन् ६३
यथा त्वत्कथितं देव त्रिदशारिविनिग्रहे तथा च तत्कृतमस्माभिः प्रसन्नो नो वृषध्वजः ६४ रथश्च विहितोऽस्माभिर्विचित्रायुधसंह
तः सारथिं च न जानीमः कस्मात्तस्मिन्नियोजयेम ६५ तस्माद्विधीयतां कश्चित्सारथिर्देवसत्तम सफलां तां गिरं देव कर्त्तुमर्हसि नो

ष्प४ विभो ६६ ॥ ॥

ग्म० ६८

सएवमस्मान्सहिपुराभगवन्नुक्तवानसि हितंकर्त्तास्मिभवतामितितन्नःकर्त्तुमर्हसि ६७ सदेवयुक्तोरथसत्तमोनोदुराधरोद्रावणःशात्रवा
णां पिनाकपाणिर्विहितोत्रयोद्धाविभीषयन्दानवानुद्यतोसौ ६८ तथैववेदाश्चतुरोहयाग्र्याधरासशैलाचरथोमहात्मनः नक्षत्रवं
शानुगतोवरूथीहरोयोद्धासारथिर्नाभिलक्ष्यः ६९ तत्रसारथिरेष्टव्यःसर्वैरेतैर्विशेषवान् तत्प्रतिष्ठोरथोदेवहयायोद्धातथैवच ७०
कवचानिसशस्त्राणिकार्मुकंचपितामह त्वामृतेसारथिंतत्रनान्यंपश्यामहेवयं ७१ त्वंहिसर्वगुणोपेतोदेवतेभ्योधिकःप्रभो सरथंतु
रीमारुह्यसंयच्छपरमान्हयान् ७२ जयायत्रिदिवेशानांवधायत्रिदशद्विषां इतितेशिरसागत्वात्रिलोकेशंपितामहं ७३ देवाः
प्रसादयामासुःसारथ्यायेतिनःश्रुतं पितामहउवाच नात्रकिंचिन्मृषावाक्यंयदुक्तंत्रिदिवौकसः ७४ संयच्छामिहयानेषयुध्यतोवैक
पर्दिनः ततःसभगवान्देवोलोकस्रष्टापितामहः ७५ सारथ्येकल्पितोदेवैरीशानस्यमहात्मनः तस्मिन्नारोहतिक्षिप्रंस्यंदनेलोकपूजि
ते ७६ शिरोभिरगमन्भूमिंतेहयावातरंहसः आरुह्यभगवान्देवोदीप्यमानःस्वतेजसा ७७ अभीशून्हिप्रतोदंचसंजग्राहपिताम
हः ततउत्थाप्यभगवांस्तान्हयाननिलोपमान् ७८ बभाषेचतदास्थाणुमारुहेतिसुरोत्तमः ततस्तमिषुमादायविष्णुसोमाग्निसंभवं
७९ आरुरोहतदास्थाणुर्धनुषाकंपयन्परान् तमारूढंतुदेवेशंतुष्टुवुःपरमर्षयः ८०॥ गंधर्वादेवसंघाश्चतथैवाप्सरसांगणाः
सशोभमानोवरदःखड्गीबाणीशरासनी ८१ प्रदीपयन्रथेतस्थौत्रीन्लोकान्स्वेनतेजसा ततोभूयोब्रवीद्देवानिंद्रपुरोगमान् ८२
नहन्यादितिकर्त्तव्योनशोकोवःकथंचन हतानित्येवजानीतबाणेनानेनचासुरान् ८३ तेदेवाःसत्यमित्याहुर्निहताइतिचाब्रुवन् नच

त्रिपु बोदेर

पुन४

क० ६९

तद्वचनंमिथ्यापदाहभगवान्प्रभुः ८४ इतिसंचिंतयैर्देवांपरांतुष्टिमवाप्नुवन् ततःप्रयातोदेवेशःसर्वैर्देवगणैर्वृतः ८५ रथेनमहताराजन्नुपमा
नास्तियस्यह स्वैश्चपारिषदैर्देवःपूज्यमानोमहायशाः ८६ नृत्यद्भिरपरैश्चैवमांसभक्षैर्दुरासदैः धावमानैःसमंताच्चतर्जमानैःपरस्परं ८७ ऋ
षयश्चमहाभागास्तपोयुक्तामहागुणाः आशंसुर्वैजयंदेवामहादेवस्यसर्वशः ८८ एवंप्रयातेदेवेशेलोकानामभयंकरे तुष्टमासीज्जगत्सर्वंदेवता
श्चनरोत्तम ८९ ऋषयस्तत्रदेवेशंस्तुवंतोवहुभिःस्तवैः तेजश्चास्मैवर्धयंतोराजन्नासन्पुनःपुनः ९० गंधर्वाणांसहस्राणिप्रयुतान्यर्बुदानिच वाद
यंतिप्रयाणेऽस्यवाद्यानिविविधानिच ९१ ततोधिरूढेवरदेप्रयातेचासुरान्प्रति साधुसाध्वितिविश्वेशःस्मयमानोऽभ्यभाषत ९२ याहिदेवय
त्तोदैत्यांश्चोदयाश्वानतंद्रितः पश्यवाह्वोर्बलंमेद्यनिघ्नतःशात्रवान्रणे ९३ ततोऽश्वांश्चोदयामासमनोमारुतरंहसः येनतत्त्रिपुरंराजन्दै
त्यदानवरक्षितं ९४ पिवद्भिरिवचाकाशंतैर्हयैर्लोकपूजितैः जगामभगवान्क्षिप्रंजयायत्रिदिवौकसां ९५ प्रयातेरथमास्थायत्रिपुराभिमु
खेभवे ननादसुमहान्नादंवृषभःपूरयन्दिशः ९६ वृषभस्यास्यनिनदंश्रुत्वाभयकरंमहत् विनाशमगमंस्तत्रतारकाःसुरशत्रवः ९७ अपरे
वस्थितास्तत्रयुद्धायाभिमुखास्तदा ततःस्थाणुर्महाराजशूलधृक्क्रोधमूर्छितः ९८ त्रस्तानिसर्वभूतानित्रैलोक्यंभूःप्रकंपिता निमित्ता
निचघोराणितत्रसंदधतःशरं ९९ तस्मिन्सोमाग्निविष्णूनांक्षोभेणब्रह्मरुद्रयोः सरथोधनुषःक्षोभाद्दतीवसवसीदति ततोनारायणस्तस्माच्छर
भागाद्विनिःसृतः वृषरूपंसमास्थायउज्जहारमहारथं १ सीदमानेरथेचैवनर्दमानेषुशत्रुषु ससंभ्रमात्तुभगवान्नादंचक्रेमहावलं २
वृषभस्यस्थितोमूर्ध्निहयपृष्ठेचमानद तदासभगवान्रुद्रोनिरैक्षद्दानवंपुरं ३ वृषभस्यास्थितोरुद्रोहयस्यचनरोत्तम स्तनौतदाश्वानपातयत्

क० ६९

रं रुद्रैव द्विधाकरोत् ४ ततः प्रभृति भद्रं ते गवां द्वैधीकृताः खुराः हयानां च तत[illegible] नाराजेन्द्र तदाप्रभृति नाभवन् ५ पीडितानां भगवता रुद्रेणाद्भुत
कर्मणा अथाधिज्यं धनुः कृत्वा शर्वः संधाय तं शरं ६ युक्त्वा पाशुपतास्त्रेण त्रिपुरं समचिन्तयत् तस्मिन्स्थिते महाराज रुद्रे विधृतकार्मुके ७
पुराणि तानि कालेन जग्मुरेकत्वं तदा एकीभावं गते चैव त्रिपुरत्वमुपागते ८ बभूव तुमुलो हर्षो दैवतानां महात्मनां ततो देवगणाः सर्वे सिद्धा
श्च परमर्षयः ९ जयेति वाचो मुमुचुः संस्तुवन्तो महेश्वरं ततोऽग्रतः प्रादुरभूत्त्रिपुरं निघ्नतोऽसुरान् १० अनिर्देश्योग्रवपुषो देवस्यासह्यते
जसः स तद्विकृष्य भगवान्दिव्यं लोकेश्वरो धनुः ११ त्रैलोक्यसारं तमिषुं मुमोच त्रिपुरं प्रति उत्सृष्टे वै महाभाग तस्मिन्निषुवरे तदा १२ महा
नार्तस्वरो ह्यासीत्पुराणां पततां भुवि तान्सासुरगणान्दग्ध्वा प्राक्षिपत्पश्चिमार्णवे १३ एवं तत्त्रिपुरं दग्धं दानवाश्चाप्यशेषतः महेश्वरे
ण क्रुद्धेन त्रैलोक्यस्य हितैषिणा १४ स चात्मक्रोधजो वह्निर्हाहेत्युक्त्वा निवारितः माकार्षीर्भस्मसाल्लोकानिति त्र्यक्षोऽब्रवीच्च तं १५
ततः प्रकृतिमापन्ना देवा लोकास्तथर्षयः तुष्टुवुर्वा[illegible]ग्र्याभिः स्थाणुमप्रतिमौजसं १६ तेऽनुज्ञाता भगवता जग्मुः सर्वे यथागतं कृतका
माः प्रयत्नेन प्रजापतिमुखाः सुराः १७ एवं स भगवान्देवो लोकस्रष्टा महेश्वरः देवासुरगणाध्यक्षो लोकानां विदधे शिवं १८ यथैव
भगवान्ब्रह्मा लोकधाता पितामहः सारथ्यमकरोत्तत्र [illegible]स परमोऽव्ययः १९ तथा भवानपि क्षिप्रं रुद्रस्येव पितामहः संयच्छतु हयानस्य
राधेयस्य महात्मनः २० त्वं हि कृष्णाच्च कर्णाच्च फाल्गुनाच्च विशेषतः विशिष्टो राजशार्दूल नास्ति तत्र विचारणा २१ युद्धे ह्ययं रुद्रक
ल्पस्त्वं च ब्रह्मसमोऽनये तस्माच्छक्तो भवान्हन्तुं मच्छत्रूंस्तानिवासुरान् २२ यथा शल्याद्य कर्णोऽयं श्वेताश्वं कृष्णसारथिं प्रमथ्य हन्या

द्रु३ गमि५

कौंतेयंतत्प्राणीग्रंविधीयतां २३ त्वयिमद्दर्शनाकांक्षाजीवितात्तेपिचैवच विजयश्चात्तपैवाघकर्णास्मिचिरकांक्षितः २४ त्वयिकर्णस्त्वराज्यंच
वंशंचैवप्रतिष्ठिताः विजयश्चैवसंग्रामेसंपश्चाद्वहयोत्तमात इमंचाप्यपरंभूयइतिहासंनिबोधमे पितुर्ममसकाशेयद्ब्राह्मणःप्राहधर्मवित
२५ श्रुत्वाचैतद्वचश्चित्रंहेतुकार्यार्थसंहितं कुरुशल्यविनिश्चित्यसमाधत्स्वविचारणा २६ भार्गवाणांकुलेजातोजमदग्निर्महायशाः
तस्यरामेतिविख्यातःपुत्रस्तेजोगुणान्वितः २७ सतीव्रंतपआस्थायप्रसादयितवाँ[illegible]वं अस्त्रहेतोःप्रसन्नात्मानियतःसंयतेंद्रियः
२८ तस्यतुष्टोमहादेवोभक्त्याचप्रशमेनच हृद्गतंचास्यविज्ञायदर्शयामासशंकरः २९ महेश्वरउवाच रामतुष्टोस्मिभद्रंतेविदितंमे
तवे[illegible]प्सितं कुरुष्वपरमात्मानंसर्वमेतदवाप्स्यसि ३० दास्यामितेतदास्त्राणियदापूतोभविष्यसि अपात्रमसमर्थंचदहंत्यस्त्राणि
भार्गव ३१ इत्युक्तोजामदग्न्यस्तुदेवदेवेनशूलिना प्रत्युवाचमहात्मानंशिरसावनतःप्रभुं ३२ यदाजानातिदेवेशःपात्रंमामस्त्र
धारणे तदाशुश्रूषवेस्त्राणिभवान्मेदातुमर्हति ३३ दुर्योधनउवाच ततःसतपसाचैवदमेननियमेनच पूजोपहारबलिभिर्होम
मंत्रपुरस्कृतैः ३४ आराधयितवानशर्वंबहून्वर्षगणांस्तदा प्रसन्नश्चमहादेवोभार्गवस्यमहात्मनः ३५ अब्रवीत्त[illegible]स्यबहुशोगुणान्दे
व्याःसमीपतः भक्तिमानेषसततंमयिरामोदृढव्रतः ३६ एवंतस्यगुणान्प्रीतोबहुशोकथयत्प्रभुः देवतानांपितृणांचसमक्षमरिसूद
न ३७ एतस्मिन्नेवकालेतुदैत्याह्यासन्महाबलाः तैस्तदादर्पमोहार्तैरवध्यंतदिवौकसः ३८ ततःसंभूयविबुधास्तान्हंतुंकृतनिश्चयाः
चक्रुःशत्रुवधेयत्नंनशेकुर्जेतुमेवतान ३९ अभिगम्यततोदेवामहेश्वरमुमापतिं प्रसादयंस्तदाभक्त्याजहिशत्रुगणानिति ४०

प्रतिस्थापयतोदेवोदेवतानांरिपुक्षयं रामंभार्गवमाहूयसोभ्यभाषतशंकरः ४१ रिपून्भार्गवदेवानांजहिसर्वान्समागतान् लोकानांहि
तकामार्थंमत्प्रीत्यर्थंतथैवच ४२ एवमुक्तःप्रत्युवाचत्र्यंबकंवरदंप्रभुं रामउवाच काशक्तिर्ममदेवेशअकृतास्त्रस्यसंयुगे ४३
निहंतुंदानवान्सर्वान्कृतास्त्रान्युद्धदुर्मदान् महेश्वरउवाच गच्छत्वंमदनुज्ञातोनिहनिष्यसिशात्रवान् ४४ विजित्यचरिपून्स
र्वान्गुणान्प्राप्स्यसिपुष्कलान् एतच्छ्रुत्वातुवचनंप्रतिगृह्यचसर्वशः ४५ रामःकृतस्वस्त्ययनःप्रययौदानवान्प्रति अब्रवीद्देवशत्रू
स्तान्मदद्र्पबलान्वितान् ४६ ममयुद्धंप्रयच्छध्वंदैत्यायुद्धमदोत्कटाः प्रेषितोदेवदेवेनवोविजेतुंमहासुराः ४७ इत्युक्ताभा
र्गवेणाथदैत्यायुद्धंप्रचक्रमुः सतान्निहत्यसमरेदैत्यान्भार्गवनंदनः ४८ ॥ ॥ वज्राशनिसमस्पर्शैःप्रहारैरेवभार्गवः
सदानवैःक्षततनुर्जामदग्न्योद्विजोत्तमः ४९ संस्पृष्टःस्थाणुनासद्योनिर्व्रणःसमजायत प्रीतश्चभगवान्देवःकर्मणातेनतस्य
वै ५० वरान्प्रादाद्बहुविधान्भार्गवायमहात्मने उक्तश्चदेवदेवेनप्रीतियुक्तेनशूलिना ५१ निपातात्तवशस्त्राणांशरीरेयाभव
द्रुजा तयातेमानुषंकर्मव्यपोढंभृगुनंदन ५२ गृहाणास्त्राणिदिव्यानिमत्सकाशाद्यथेप्सितं दुर्योधनउवाच ततोस्त्राणि

समस्तानिवरांस्त्वमनसेऽस्मितान् ५३ लब्धाबहुविधानाम· प्रणम्यशिरसाभवं अनुज्ञांप्राप्यदेवेशात्तज्जगामसममहातपाः ५४ एव
मेतत्पुरावृत्तंतदाकथितवानृषिः भार्गवोपिददौदिव्यंधनुर्वेदंमहात्मने ५५ कर्णायपुरुषव्याघ्रसुप्रीतेनांतरात्मना हृजितंहिमेव
त्किंचिद्यदिकर्णस्यपार्थिव ५६ नास्मैयस्त्राणिदिव्यानिप्राद्दास्यद्भृगुनंदनः नापिसूतकुलेजातंकर्णमन्येकथंचन ५७ देव
पुत्रमहंमन्येक्षत्रियाणांकुलोद्भवं विसृष्टमववोधार्थंकुलस्येतिमतिर्मम ५८ सर्वथानह्ययंशल्यकर्णःसूतकुलोद्भवः स
कुंडलंसकवचंदीर्घबाहुंमहारथं ५९ कथमादित्यसदृशंमृगीव्याघ्रंजनिष्यति पश्यह्यस्यभुजौपीनौनागराजकरोपमौ ६०

६१ ६२ चतुस्त्रिंश: एवं ४ नरसिंहयो: कृष्णार्ज्जुनयो: अतस्तयोर्मध्येमाम्मंममकीर्त्तिकरमेवेतिभाव: मँ सिंहयोरितिपाठेरुद्रपितामहयो: ९

अ१ न१

वक्ष: परमविशालंचसर्वशत्रुनिबर्हणं नत्वेष: प्राकृत: कश्चित्कर्णोवैकर्त्तनोनृप: ६१ महात्माह्येषराजेंद्ररामशिष्य: प्र
तापवान् ६२ इतिश्रीकर्णपर्वणित्रिपुरवधोपाख्यानं दुर्योधनउवाच एवंसभगवान्देव: सर्वलोकपितामह: सारथ्यमकरो
त्तत्रब्रह्मारुद्रोभवद्रथी १ रथिनोभ्यधिकोवीर कर्त्तव्योरथसारथि: तस्मात्त्वंपुरुषव्याघ्रनियच्छतुरगान्युधि २ यथादेवगणैस्त
त्रवृतोपत्नोपितामह: तथास्माभिर्भवान्यत्नात्कर्णादभ्यधिकोवृत: ३ यथादेवैर्महाराजईश्वरादधिकोवृत: तथाभवानपि
क्षिप्रंरुद्रस्येवपितामह: ४ नियच्छतुरगान्युद्धेराधेयस्यमहाद्युते शल्यउवाच मयाप्येतन्नरश्रेष्ठबहुशोनरसिंहयो: ५ क
थ्यमानंश्रुतंदिव्यमाख्यानमतिमानुषं यथाचचक्रेसारथ्यंभवस्यप्रपितामह: ६ यथासुराश्चनिहतास्त्वषुणैकेनभारत
कृष्णस्यचापिविदितंसर्वमेतन्महात्मन: ७ यथापितामहोजज्ञेभगवान्सारथिस्तदा अनागतमतिक्रान्तंवेदकृष्णोपितत्त्व
त: ८ एतदर्थंविदित्वापिसारथ्यमुपजग्मिवान् स्वयंम्भुरिवरुद्रस्यकृष्ण: पार्थस्यभारत ९ ॥ ॥ ॥ ॥

कुर

क०
७३

यदिहन्याद्वकौंतेयंसूतपुत्रःकथंचन दृष्ट्वापार्थंहिनिहतंस्वयंयोत्स्यतिकेशवः १० शंखचक्रगदापाणिर्द्धक्ष्येतेनववाहिनी नचापिजि
स[illegible]द्धस्यवार्ष्णेयस्यमहात्मनः ११ स्थितास्तेत्रप्रत्यनीकेषुकश्चिद्दत्रनपल्लव संजयउवाच तेत्रयथाभाषमाणंतुमद्रराजमरिंदमः १२
प्रत्युवाचमहाबाहुरदीनात्मासुतनलव मावमंस्थामहाबाहोकर्णंविकर्त्तनंरणे १३ सर्वशास्त्रभृतांश्रेष्ठंसर्वशास्त्रार्थपारगं यस्यज्या
तलनिर्घोषंश्रुत्वाभयकरंमहत् १४ पांडवेयानिसैन्यानिविद्रवंतिदिशोदश प्रत्यक्षंतेमहाबाहोयथारात्रौघटोत्कचः मायाशतानिकु
र्वाणोहतोमायापुरस्कृतः १५ नावतिष्ठतिबीभत्सुःप्रत्यनीकेकथंचन एतांश्चदिवसान्सर्वा[illegible]येनमहताहृतः भीमसेनश्चबलवा
न्धनुष्कोद्याभिचोदितः १७ उक्तश्चसंजयाराजन्मूढश्चौदरिकोयथा माद्रीपुत्रौतथाशूरौयेनजित्वामहारणे १८ कस्मपार्थपुर[illegible]
स्कृत्यनहतोयुधिमारिष येनहृष्टिप्रवीरस्तुसात्यकिःसात्वतांवरः १९ निर्ज्जितःसमरेवीरोविरथश्चबलात्कृतः संजयाश्चैवतेरेस
र्वेधृष्टद्युम्नपुरोगमाः २० असकृन्निर्जिताःसर्वेस्मयमानेननसंयुगे तंकथंपांडवायुद्धेविजेष्यंतिमहारथं २१ ॥

राम०
७३

२२ किमर्थमिति सारथ्यमात्रं प्रतिसामप्राप्तिमथं चेन्मन्यसे कुर्यात्त्वर्हि त्वं युध्यतद्धन्मिष्याप्रतिज्ञो न भविष्यसीति भावः २६ पदवीमान्तरापं ३१ ३२

योहन्यात्समरे क्रुद्धो वज्रहस्तं पुरंदरं त्वंच सर्वास्त्रविद्वीर सर्वविद्यास्त्रपारगः २२ बाहुवीर्येणतेतुल्यः पृथिव्यांनास्तिकश्च
न त्वंशल्यभूतः शत्रूणामविषह्यः पराक्रमे २३ ततस्त्वमुच्यसेराजन्शल्यइत्यरिसूदन तवबाहुबलंप्राप्यनशेकुः सर्व
सात्वताः २४ तवबाहुबलाद्राजन्किंतुकृष्णोबलाधिकः यथाहिकृष्णेतिबलंधार्यंवैफाल्गुनेहते २५ तथाकर्णात्यया
भावेत्वयाधार्यंमहद्बलं किमर्थंसमरेसैन्यंवासुदेवोन्यवारयत् २६ किमर्थंचभवान्सैन्यंनहनिष्यतिमारिष त्वत्कृतेपदवी
गंतुमिच्छेयंयुधिमारिष २७ सोदराणांचवीराणांसर्वेषांचमहीक्षितां शल्यउवाच यन्मांब्रवीषिगांधारेअग्रेसैन्यस्यमान
द विशिष्टंदेवकीपुत्रात्प्रीतिमानस्म्यहंत्वयि २८ एषसारथ्यमातिष्ठेराधेयस्ययशस्विनः युध्यतःपांडवाग्र्येणयथात्वं
वीरमन्यसे २९ समयश्चहिमेवीरकश्चिद्वैकर्तनंप्रति उत्सृजेयंयथाश्रद्धमहंवाचोस्यसंनिधौ ३० संजयउवाच तथेति
राजन्पुत्रस्तेसहकर्णेनमारिष अब्रवीन्मद्रराजानंसर्वक्षत्रस्यसंनिधौ ३१ सारथ्यस्याभ्युपगमाच्छल्येनाश्वासितस्तदा दु
र्योधनस्तदाहृष्टःकर्णंतमभिसस्वजे ३२ ॥

क० ३३ ३४ ३५ ३६ ४० ४१ ४२ वक्ष्येवोदास्मि ४३ ४४

श्चाब्रवीत्पुनः कर्णस्त्वमानः सुतस्तव जहिपार्थान्रणेसर्वान्त्वमिहैद्रोणानवानिव ३३ सशल्येनाभ्युपगतेहयानांसंनियच्छ
ने कर्णोहृष्टमनाभूयोदुर्योधनमभाषत ३४ नातिहृष्टमनाह्येषमद्रराजोभिभाषते राजन्मधुरयावाचापुनरेनंब्रवीहिवै ३५
ततोराजामहाप्राज्ञः सर्वास्त्रकुशलोबली दुर्योधनोब्रवीच्छल्यंमद्रराजंमहीपतिं ३६ पूरयन्निवघोषेणमेघगंभीरयागिरा
शल्यकर्णोर्जुनेनाद्ययोद्धव्यमितिमन्यते ३७ तस्यत्वंपुरुषव्याघ्रनियच्छतुरगान्युधि कर्णोहित्वेतरान्सर्वान्फाल्गुनंहन्तुमिच्छ
ति ३८ तस्याभीषुग्रहेराजन्प्रयाचेत्वांपुनः पुनः पार्थस्यसचिवः कृष्णोयथाभीषुग्रहोवरः ३९ तथात्वमपिराधेयंसर्वतः
परिपालय ४० संजयउवाच ततःशल्यःपरिष्वज्यसुतंतेवाक्यमब्रवीत् दुर्योधनममित्रघ्नंप्रीतोमद्राधिपस्तदा ४१ शल्य
उवाच एवंचेन्मन्यसेराजन्गान्धारेप्रियदर्शन तस्मात्तेयत्प्रियंकिंचित्तत्सर्वंकरवाण्यहं ४२ यत्रास्मिभरतश्रेष्ठयोग्यः
कर्मणिकर्हिचित् तत्रसर्वात्मनायुक्तोवक्ष्येकार्यपरंतप ४३ यत्तुकर्णमहंब्रूयांहितकामःप्रियाप्रियं ममतत्क्षमतांस
र्वंभवान्कर्णश्चसर्वशः ४४

४५ आत्मनिंदापरत्वं वा वपि श्रेयसां निधौ किमुतात्मप्रजापरनिंदेत्तदुभयमहं करोमीति भावः ४७ अप्रमादो वधानं प्रयोगः अस्त्रप्रेरणं ज्ञानं आगा

कर्णउवाच ईशानस्य यथा ब्रह्मा यथा पार्थस्य केशवः तथा नित्यं हिते युक्तो मद्रराज भवस्व नः ४५ शल्यउवाच आत्मनिंदात्मपू
जा च परनिंदा परस्तवः अनाचरितमार्याणां वृत्तमेतच्चतुर्विधं ४६ यत्तु विद्वन्प्रवक्ष्यामि प्रत्ययार्थमहं तव आत्मनः स्तवसंयुक्तं त
न्निबोध यथातथं ४७ अर्हः शक्रस्य सारथ्ये योग्यो मातलिवत्प्रभो अप्रमादप्रयोगाच्च ज्ञानविद्याचिकित्सितैः ४८ ततः पार्थेन संग्रामे यु
ध्यमानस्य तेनघ वाहयिष्यामि तुरगान्विज्वरो भव सूतज ४९ इति श्रीकर्णपर्वणि दुर्योधन उवाच अयं ते कर्ण सारथ्यं मद्रराजः करि
ष्यति कृष्णादभ्यधिको यंता देवेशस्येव मातलिः १ यथा हरिहयैर्युक्तं संगृह्णाति स मातलिः शल्यस्तथा तव द्यायं संयंता रथवाजि
नां २ योधे त्वयि रथस्थे च मद्रराजे च सारथौ रथश्रेष्ठो ध्रुवं संख्ये पार्थान्नाभिभविष्यति ३ संजय उवाच ततो दुर्योधनो भूयो मद्रराजं त
रस्विनं उवाच राजन्संग्रामे व्युषिते पर्युपस्थिते ४ कर्णस्य यच्छ संग्रामे मद्रराज हयोत्तमान् त्वयाभिगुप्तो राधेयो विजेष्यति धनंज
यं ५ ॥

मिदोषावेक्षणं विद्या तत्परिहारज्ञानं चिकित्सनं दोषपरिहारसामर्थ्यं ४८ पंचत्रिंशः अयं १ हरिहयैः इंद्राश्वैर्युक्तं रथं २ अव्युषिते प्रातःकाले ५

क० ७५

इत्युक्तोरथमास्थायपतत्येनिम्राहभारत शल्येभ्युपगतेकर्णःसारथ्येसुमनाब्रवीत् ६ त्वंसूतस्यंदनंमह्यंकल्पयेत्यसकृत्त्वरन् ततोजैत्रंरथवरंगंधर्व
नगरोपमं ७ विधिवत्कल्पितंभद्रंजयेत्युक्त्वान्यवेदयत् तंरथंरथिनांश्रेष्ठःकर्णोभ्यर्च्ययथाविधि ८ संपादितंब्रह्मविदापूर्वमेवपुरोधसा
कृत्वाप्रदक्षिणंयत्नादुपस्थायचभास्करं समीपस्थंमद्रराजमारोहत्वमथाब्रवीत् ततःकर्णस्यदुर्धर्षंस्यंदनप्रवरंमहत् १० आरुरोहमहाते
जाःशल्यःसिंहइवाचलं ततःशल्यास्थितंदृष्ट्वाकर्णःस्वंरथमुत्तमं ११ अध्यातिष्ठद्यथांभोदंविद्युत्वंतंदिवाकरः तावेकरथमारूढावा
दित्याग्निसमत्विषौ १२ अभ्राजेतांयथामेघेसूर्याग्नीसहितौदिवि संस्तूयमानौतौवीरौतदास्तांद्युतिमत्तमौ १३ ऋत्विक्सदस्यैरिंद्रा
ग्नीस्तूयमानाविवाध्वरे सशल्यसंगृहीताश्वेरथेकर्णःस्थितोभवत् १४ धनुर्विस्फारयन्घोरंपरिवेषीवभास्करः आस्थितःसरथश्रे
ष्ठंकर्णःशरगभस्तिमान् १५ प्रबभौपुरुषव्याघ्रोमंदरस्थइवांशुमान् तंरथस्थंमहाबाहुंयुद्धायामिततेजसं १६ दुर्योधनस्तुराधेयमि
दंवचनमब्रवीत् अकृतंद्रोणभीष्माभ्यांदुष्करंकर्मसंयुगे कुरुष्वाधिरथेवीरमिषतांसर्वधन्विनां मनोगतंममह्यासीद्भीष्मद्रोणौमहारथौ
१८ अर्जुनंभीमसेनंचनिहंताराविति ध्रुवं ताभ्यांयदकृतंवीरवीरकर्ममहामृधे १९ तत्कर्मकुरुराधेयवज्रपाणिरिवापरः गृहाणध
र्मराजंवाजहिवात्वंधनंजयं २० भीमसेनंचराधेयमाद्रीपुत्रौयमावपि जयश्चतेस्तुभद्रंतेप्रयाहिपुरुषर्षभ २१ पांडुपुत्रस्यसैन्यानिकु
रुसर्वाणिभस्मसात् ततस्तूर्यसहस्राणिभेरीणामयुतानिच २२ वाद्यमानान्यरोचंतमेघशब्दोयथादिवि प्रतिगृह्यतुतद्वाक्यंरथस्थोर

राम० ७५

२३ अभ्यभाषत राधेयः शल्यं युद्धविशारदं चोदयाश्वान्महाबाहो यावद्धन्मि धनंजयं २४ भीमसेनं यमौ चोभौ राजानं च युधिष्ठिरं
अद्य पश्यतु मे शल्य बाहुवीर्यं धनंजयः २५ अस्यतः कंकपत्राणां सहस्राणि शतानि च अद्य क्षेप्स्याम्यहं शल्य शरान्परम
तेजसः पंचालानां विनाशाय दुर्योधनजयाय च शल्य उवाच सूतपुत्र कथं तु त्वं पांडवानवमन्यसे सर्वास्त्रज्ञान्महेष्वासान्स
र्वानेव महाबलान् अनिवर्तिनो महाभागानजय्यान्सत्यविक्रमान् २८ अपि संजनयेयुर्ये भयं साक्षाच्छतक्रतोः यदा स्रो
ष्यसि निर्घोषं विस्फूर्जितमिवाशनेः २९

३० ३४ षट्त्रिंशः दृष्ट्वा १ तरस्विनांश्चाम्बादीनां ३ ववाशशब्दंचकार २ रामेतिपाठेपिसएवार्थः निःसरंतोयुद्धायमितिशेषः सूर्यान्तरर्पमा

राधेयगांडिवस्यांजोनतदानैवंवदिष्यसि यथाद्रक्ष्यसिभीमेनकुंजरानीकमाहवे ३० विशीर्णदंतंनिहतंनतदानैवंवदिष्यसि यदाद्र
क्ष्यसिसंग्रामेधर्मपुत्रंयमौतथा ३१ शितैःपृषत्कैःकुर्वाणानभ्रच्छायामिवांबरे अस्यतःक्षिप्रावतश्चारीन्लघुहस्तानदुरासदा
न ३२ पार्थिवानपिचान्यांस्त्वंनतदानैवंवदिष्यसि संजयउवाच अनादृत्यतुतद्वाक्यंमद्रराजेनभाषितं याहीत्येवाब्रवीत्कर्णो
मद्रराजंतरस्विनं ३३ इतिश्रीकर्णपर्वणिकर्णशल्यसंवादे संजयउवाच दृष्ट्वाकर्णंमहेष्वासंयुयुत्सुंसमवस्थितं चुक्रुशुः
कुरवःसर्वेहृष्टरूपाःसमंततः १ ततोदुंदुभिनिर्घोषैर्भेरीणांनिनदेनच बाणशब्दैश्चविविधैर्गर्जितैश्चतरस्विनां २ निर्ययु
स्तावकायुद्धेमृत्युंकृत्वानिवर्तनं प्रयातेतुततःकर्णेयोधेषुमुदितेषुच ३ चचालपृथिवीराजन्ररासचसविस्तरं निःसरंतो
व्यदृश्यंतसूर्यात्सप्तमहाग्रहाः ४ उल्कापाताश्चसंजज्ञुर्दिशांदाहास्तथैवच शुष्काशन्यश्चसंपेतुर्ववुर्वाताश्चभैरवाः ५ मृगप
क्षिगणाश्चैवपृतनांबहुशस्तव अपसव्यंतदाचक्रुर्वेदयंतोमहाभयं ६ प्रस्थितस्यचकर्णस्यनिपेतुस्तुरगाभुवि अस्थिवर्षंच
पतितमंतरिक्षाद्भयानकं ७

रम्यसूर्यादयोन्योन्यंयुध्यंतीत्यर्थः ४ ५ ६ ७ ॥ ॥ ॥

१० भीष्मद्रोणौ अतिक्रांतवीर्यपयोस्तावतिवीर्यौ समीक्ष्य स्वकृतमालोच्य जगादेत्युत्तरेणान्वयः आभाष्य मोशल्य इति संबोध्य १२ अस्थि

उज्वलस्यैव शक्त्याग्निश्चन्द्रस्यैव चकंपिरे अग्निरोचस्समुचंत वाहनानि विशांपते ८ एते चान्ये च बहवउत्पाता दारु-
णाः समभूवन्विनाशाय कौरवाणां सुदारुणाः ९ नच तान्गणयामासुः सर्वे दैवेन मोहिताः मस्त्विंजेसत्तसत्रं चजयेत्युचुर्न-
राधिपाः निर्जितान्पांडवान्स्वैव भेजिरे तत्र कौरवाः १० ततो रथस्थः परवीरहंता भीष्मद्रोणावतिवीर्यौ समीक्ष्य स्वमुज्वल-
न्दास्कन्दपावकाभो वैकर्तनो मोहरथकुंजरेन्द्र ११ मशल्यमाभाष्य जगाद वाक्यं पार्थस्य कर्मातिशयं विचिंत्य मानेन दर्पे-
णाविदह्यमानः क्रोधेन दीप्यन्निव विनिश्वसन्च १२ नाहं महेंद्रादपि वज्रपाणेः क्रुद्धाद्विभेम्यायुधवान्रथस्थः दृष्ट्वा हि भीष्म-
प्रमुखान्शयानाना नैव मां ह्यस्थिरता जहाति १३ महेंद्रविष्णुप्रतिमावनिंदितो रथाश्वनागप्रवरप्रमाथिनौ अवध्यकल्पौ
निहतौ यदा परैस्ततो न मेप्यस्ति रणे घसाध्वसं १४ समीक्ष्य संख्येतिवलान्नराधिपान्ससूतमातंगरथान्परैर्हतान् कथं न स-
र्वानहितान्रणे वधीन्महास्त्रविद्वान्रणपुंगवो गुरुः १५

रताजहातीमचंचलोस्मीत्यर्थः १३ ततो पि मे घसाध्वसं भयं नास्तीति योजना १४ १५ ॥ ॥ ॥ ॥ ॥

द्रो०
७७

अनुरागत्रासमन्त्रस्तमन्त्रस्तेन १७ विधांजानीयां भावं स्वाहं स्वासामीतिनिश्चयं १८ अस्त्रादीनि मनुष्य समसुखापवर्जितेन अलमिति संबंधः १९ उशा

स संस्मरन्द्रोणमहं महाहवे ब्रवीमि सत्यं कुरवो निबोधत न वो मदन्यः प्रसहेद्द्रोणार्ज्जुनेन समागतं मृत्युमिवोग्ररूपिणं १६ शिक्षाप्रसादश्च बलं धृतिश्च द्रोणे महास्त्राणि च संनतिश्च सचेदगान्मत्स्ववशं महात्मा सर्वान्नरान्नातुरान घमन्ये १७ नेह ध्रुवं किंचिदपि प्रचिंतये विधो लोके कर्मणोदेवयोगात् स्वर्पीदये को हि विमुक्त संशयो भावं कुर्वीताघगुरौ निपाति ते १८ ननूनमस्त्राणि बलं पराक्रमः क्रियाः सुनीतं परमायुधानि वा अलं मनुष्य समसुखापवर्ज्जितुं तथा हि युद्धे निहतः परैर्गुरुः १९ हुताशनादित्यसमानतेजसं पराक्रमे विष्णुपुरंदरोपमं नयेवृहस्पत्युशनोः सदासमं न चैनमस्त्रं तदुपास्त दुःसहं २० संप्राकुष्टे रुदिते स्त्रीकुमारे पराभूते पौरुषे धार्त्तराष्ट्रे मया कृत्यमिति तिज्जानामि शल्य प्रयाहि तस्माद्विषतामनीकं २१ यत्र राजा पांडवः सत्यसंधो व्यवस्थितो भीमसेनार्ज्जुनौ च वासुदेवः सात्यकिः संजयाश्च यमौ च कस्तान्विषहेन्मदन्यः २२ तस्मात्क्षिप्रं मद्रपते प्रयाहि रणे पांचालान्पांडवान्संजयांश्च तान्वा हनिष्यामि समेत्य संख्ये यास्यामि वा द्रोणपथाय माय २३

नोः उशनसोः उपास्त उपातिष्ठत त्रातुमिति शेषः अस्त्रं अस्त्रादि २० संप्राकृष्टे सम्यगाक्रोशवति पराभूते निरस्ते धार्त्तराष्ट्रे धृतराष्ट्रपुत्र संबंधिनि पौरुषे यत्ने २२ द्रोणायथा द्रोणपथेन २३

कु२

राम०
७७

षा१

तैः भीष्मादीनां मध्येन गमिष्यामीति न अपि मरिष्याम्येवेत्यर्थः संग्रामात् अपलापेन हि मित्रस्य दुर्योधनस्य द्रोहः कृतः स्यात् चैमहं २४ जीवितं नेत्रा

नैवाहं नगमिष्यामि मध्ये तेषां महारथानामिति मां शल्य विद्धि मित्रद्रोहो हि मर्षणीयो न मेऽयं त्यक्त्वा प्राणाननुयास्यामि द्रोणं
२४ प्राप्तस्य सख्युः स च जीवितान्ते नास्ति प्रमोक्षो न कसत्कृतस्य अतो विदन्नमियास्यामि पार्थमिन्द्रेष्टं न शकं यति वर्त्ति
हं वै २५ कल्याणवृत्तः सततं हि राजा वैचित्रवीर्यस्य सुतो ममासीत् तस्यार्थसिद्ध्यर्थमहं त्यजामि प्रियान्भोगान्दुस्त्यजं जीवि
तं च २६ वैयाघ्रचर्माणमकूजनाक्षं हेमत्रिकोशं रजतत्रिवेणुं रथप्रवर्हं तुरगप्रवर्हैर्युक्तं प्रादान्मह्यमिमं हि रामः २७
धनूंषि चित्राणि निरीक्ष्य शल्य ध्वजान्गदाः सायकांश्चोग्ररूपान् असिं च दीप्तं परमायुधं च शंखं च शुभ्रं स्वनवन्तमुग्रं
२८ पताकिनं वज्रनिपातनिस्वनं सिताश्वयुक्तं शुभतूणशोभितं इमं समास्थाय रथं रथर्षभं रणे हनिष्याम्यहमर्जुनं व
लात् २९ तं चेन्मृत्युः सर्वहरोऽभिरक्षेत्सदा प्रमत्तः समरे पाण्डुपुत्रं तं वा हनिष्यामि रणे समेत्य यास्यामि वा भीष्ममुखो यमाय ३० यमव
रुणकुबेरवासवा वा यदि युगपत्सगणा महाहवे जुगुपिषव इह पाण्डवं किं बहुना सह तैर्जयामि तं ३१ ॥ ॥ ॥

सुषः समाहितोऽप्रमोक्षो मत्सु निवर्त्तते २६ वैयाघ्रचर्माणं व्याघ्रचर्मपरिवृतं २९ अप्रमत्त इति च्छेदः भीष्ममुखः भीष्माभिमुखः ३० जुगुपिषवः गो

श्लो ८

रणारभसस्य रणोत्कटस्य ३२ अतिरभसोपि त्वं त्वतिवाचं स्वसामर्थ्यादधिकां ३३ं पुरुषवरसकाशमावर्जां कनीयसीं सुभद्रां ३६ स्मरसीतिविषमं छंदः ३७

संजयउवाच इतिरणारभसस्यकत्थतस्तदुपनिशम्य वचस्समद्रराट् अवहसदवमन्यवीर्यवान्प्रतिषिषेधेचजगाद चोत्तरं ३२
शल्यउवाच विरमविरमकर्णकत्थनादतिरभसोप्यतिवाचमुक्तवान् कचहिनरवरोधनंजयः कपुनरहोपुरुषाधमोभवान् ३३
यदुसदनमुपेंद्रपालितं त्रिदिव मिवामरराजरक्षितं प्रसभमभिविलोड्यकोहरेत्पुरुषवरावरजामृतेर्जुनात् ३४ त्रिभुवनविभुमीश्वरेश्व
रं कइहपुमान्भवमाह्वयेद्युधि मृगवधकलहे ऋतेर्जुनात्सुरपतिवीर्यसमप्रभावतः ३५ असुरसुरमहोरगान्नरान् गरुडपिशाचसय
क्षराक्षसान् इषुभिरजयदग्निगौरवात्स्वभिलषितंचहविर्ददौजयः ३६ स्मरसिननुयदापरैर्हृतः सचधृतराष्ट्रसुतोपिमोक्षितः दि
नकरसदृशैः शरोत्तमैर्युधिकुरुषुबहून्विनिहत्यतानरीन् ३७ प्रथममपिपलायितेत्वयिप्रियकलहाधृतराष्ट्रसूनवः स्मरसिननुय
दापमोचिताः खचरगणानवजित्यपाण्डवैः ३८ समुदितबलवाहनाः पुनः पुरुषवरेणजिताःस्थगोग्रहे सगुरुगुरुसुताः सभीष्मकाः
किमुनजितः सतदात्वयार्जुनः ३९

खचरगणानगंधर्वान ३८ ३९ ॥ ॥ ॥ ॥ ॥

४४ श्वेतयुजाश्वेतास्वयुजा ४५ सप्तत्रिंशः प्रयाणेपिच्छभिमन्येतच्छल्यमित्यवज्ञानीतच्छ्रंजनेकशीभिः हस्सकेशीभिरश्वतरीभिः युवतीभिर्वायुक्तं ६ ॥

इदमपरमुपस्थितंपुनस्तवनिधनायसुयुद्धमद्यवै यदिनरिपुभयात्पलायसेसमरगतोद्यहतोसिसूतज ४० संजयउवाच इतिवहु
परुषंप्रभाषतिप्रमनसिमद्रपतौरिपुस्तवे भृशमभिरुषितः परंतपः कुरुद्वहनापतिराहमद्रपं ४१ कर्णउवाच भवतुभवतःकिंविकत्थ
सेनननुममतस्यहियुद्धमुद्यतं यदिसजयतिमामिहाहवेननु इदमस्तुसुकथितंतव ४२ संजयउवाच एवमस्त्वितिमद्रेशउक्त्वानोत्तरमुक्तवान
याहिशल्येतिचाप्येनंकर्णःप्राहयुयुत्सया ४३ सरथः प्रययौशत्रूनश्वेताश्वः शल्यसारथिः निघ्नन्नमित्रान्समरेतमोघ्नन्सवितायथा ४४
ततः प्रायात्प्रीतिमान्वैरथेनवैयाघ्रेणाश्वेतयुजाथकर्णः सचालोक्यध्वजिनींपांडवानांधनंजयंत्वरयापर्यपृच्छत् ४५ इतिकर्णपर्वणि सं
जयउवाच प्रयाणेचततः कर्णोहर्षयन्वाहिनींतव एकैकंसमरेदृष्ट्वापांडवान्पर्यपृच्छत योमामद्यमहात्मानंदर्शयेच्छ्वेतवाहनं तस्मैद
द्यामभिप्रेतंधनंयन्मनसेच्छति २ नचेत्तदभिमन्येततस्मैदद्यामहंपुनः शकटंरत्नसंपूर्णंयोमेब्रूयाद्धनंजयं ३ नचेत्तदभिमन्येतपुरुषोर्जु
नदर्शिवान शतंदद्यांगवांतस्मैनैत्यकंकांस्यदोहनं ४ शतंग्रामवरांश्चैवदद्यामर्जुनदर्शिने तथातस्मैपुनर्दद्यांश्वेतमश्वतरीरथं ५ यु
क्तमंजनकेशीभिर्योमेब्रूयाद्धनंजयं नचेत्तदभिमन्येतपुरुषोर्जुनदर्शिवान ६ ॥ ॥ ० ॥ ॥

हस्तिषड्गवं हस्तिषद्गं हस्तिषड्गवमिष्ठं तिवीराः षट्कचदंतिनामिति प्रांचः अन्ये वासौ वर्णो रथमिति शेषः हस्तिरल्पाः षट्गावउक्षाणो यस्मिन् तं षट्हस्तिन

अन्यच्चास्मै पुनर्ददौ वासौ वर्णौ हस्तिषड्गवं तथाप्यस्मै पुनर्ददौ स्त्रीणां शतमलंकृतं ७ श्यामानां निष्ककंठीनां गीतवाद्यविपश्चितां नचे
तेदभिमन्येत पुरुषोर्ज्जुनदर्शिवान् ८ तस्मै ददौ शतं नागान् शतं ग्रामान् शतं रथान् सुवर्णस्य च मुख्यस्य हयाग्र्याणां शतं शतान् ९
आगुणैः सदंतान् धुर्यवाहान् सुशिक्षितान् तथा सुवर्णशृंगीणां गोधेनूनां चतुःशतं १० ददौ तस्मै सुवत्सानां पयो मिश्रपाह्वने
जयं नचेत्तदभिमन्येत पुरुषोर्ज्जुनदर्शिवान् ११ अन्यदस्मै वरं ददौ श्वेतान् पंचशतान् हयान् हेमभांडपरिछन्नान् सुमृष्टमणिम-
षणान् १२ सदंतान् अपि चैवाहं ददौ अष्टादशापरान् रथं च सुभ्रं सौवर्णं ददौ तस्मै स्वलंकृतं १३ युक्तं परमकांबोजैर्यो नित्युपाह्वने
जयं नचेत्तदभिमन्येत पुरुषोर्ज्जुनदर्शिवान् १४ अन्यदस्मै वरं ददौ कुंजराणां शतानि षट् कांचनैर्विविधैर्भांडैराछन्नान् हेममालिनः
१५ उत्पन्नान् अपरांतेषु विनीतान् हस्तिशिक्षकैः नचेत्तदभिमन्येत पुरुषोर्ज्जुनदर्शिवान् अन्यदस्मै वरं ददौ वैश्यग्रामांश्चतुर्दश सुस्फी
तान् धनसंयुक्तान् प्रभासन्नवनोदकान् अकुतोभयान् संपन्नान् राजभोज्यांश्चतुर्दश १६ ॥ ॥

स्वर्गा बद्धवोठारोपसमंतात्हर्षं ७ श्यामानां अप्रजातानां निष्कमुरोभूषणं ८ शतं शतानां दशसहस्राणि ९ आधायुक्ता सदंतान् विनीतान् धुर्यवाहान् रथयो
दहनक्षमान् १० भांडमाभरणं १५ अपरांतेषु पश्चिमकोष्ठेषु १६

प्रत्यग्रवयसांच्चाभिनवयौवनां ७ प्लवमानंप्रयांते १६ अष्टत्रिंशः मासूत १ वसुविनंद्दृष्टामिद्रक्ष्यसि २ ३

दास्मीनांनिष्ककंठीनांमागधीनांशतंतथा प्रत्यग्रवयसांदद्यांयोमेब्रूयाद्धनंजयं १७ नचेत्तदस्मिन्नेवंतपुरुषोर्ज्जुनदर्शिवान अन्यंतस्मै वरंदद्यांयमसौकामयेत्स्वयं १८ पुत्रदारान्विहारांश्चयदन्यद्वित्तमस्तिमे तच्चतस्मैपुनर्द्दद्यांयद्यच्चमनसेछति १९ हत्वाचसहितौकृ ष्णौतयोर्वित्तानिसर्वशः तस्मैदद्यामहंयोमेप्रब्रूयात्केशवार्ज्जुनौ २० एतावाचः सुबहुशः कर्णउच्चारयन्युधि दध्मौसागरसंभूतंसुस्वरंशं खमत्तमं २१ तावाचः सूतपुत्रस्यतथायुक्तानिशम्यतु दुर्योधनोमहाराजसंहृष्टः सानुगोभवत् २२ ततोदुंदुभिनिर्घोषामृदंगानांचस र्वशः सिंहनादः सवादित्रः कुंजराणांचनिस्वनः २३ प्रादुरासीत्तदाराजन् सैन्येपुरुषर्षभ योधानांसंप्रहृष्टानांतथासमभवत्स्वनः २४ तथाप्रहृष्टेसैन्येतुप्लवमानंमहारथं विकत्थमानंचतदाराधेयमरिकर्षणं २५ मद्रराजः प्रहस्येदंवचनंप्रत्यभाषत इतिकर्णपर्वणि शल्यउवाच मासूतपुत्रदानेनसौवर्णंहस्तिषड्गवं प्रयच्छपुरुषायाद्यद्रक्ष्यसित्वंधनंजयं १ वाल्यादिहत्वंत्यजसिवसुवैश्रवणो यथा अयत्नेनैवराधेयद्रष्टास्यद्यधनंजयं २

ख्यत

क०
८०

परास्त्रजासिद्रथात्त्वजसि २ अबद्धंत्वनर्थकं अकांगा अनाकर्णनीयं ८ सहितोयुध्यस्वनत्वेकाकी ९ सर्वंस्त्रहस्तयदिजिजीविषुः

परास्त्रजासियद्वित्तंकिंचित्त्वंबद्धमस्त्ठवत् अपात्तदोनयेदोषात्तान्मोहान्नावबुध्यसे ३ यत्वंप्ररपमेवित्तंवङ्गेनरवल्तुत्वया शाकंवङ्कवि
धैयस्त्रेर्यहूंस्तनयञस्वैतः ४ यच्चप्रार्थयसेहन्तुंकृस्लोमोहाहृयेवतत् नहिसम्प्रमसंमर्देक्रोधशमिहोनिपातितो ५ अप्रार्थितंप्रार्थय
सेसुहृद्रोनहिंसतित्त येत्वांनिवारयन्त्यस्मात्प्रपतंतंक्कुताशने ६ कार्याकार्यंनजानीषेकालपक्वोस्यसंशयं वद्धवेदमकल्याणंकोहि
नृपात्त्रिजिजीविषुः ७ समुद्रतरणंदोर्भ्यांकंठेवध्वायथाशिलां गिर्यग्राद्वानिपतनंतादृक्तवचिकीर्षितं ८ सहितःसर्वयोधैस्त्वंव्यूढा
नीकैःसुरक्षितः धनंजयेनयुध्यस्वश्रेयस्त्वात्ममिच्छसि ९ हितार्थंधार्त्तराष्ट्रस्यब्रवीमित्वांनहिंसया श्रद्धत्स्वैवमयाप्रोक्तंयदितेस्तिजि
जीविषा १० कर्णउवाच स्ववाहुवीर्यमाश्रित्यप्रार्थयाम्यर्ज्जुनंरणे त्वंत्वमित्रमुखःशत्रुर्मांभीषयितुमिच्छसि ११ नमामस्मादभि
प्रायात्कश्चिदद्यनिवर्त्तयेत् अपीन्द्रोवज्रमुद्यम्यकिमुमर्त्यःकथंचन १२ संजयउवाच इतिकर्णस्यवाक्यांतेशल्यःप्राहोत्तरंवचः चु
कोपयिषुरत्यर्थंकर्णंमद्रेश्वरःपुनः १३ यदावैत्वांफाल्गुनवेगयुक्ताज्याचोदिताहस्तवताविसृष्टाः अन्वेतारःकंकपत्राःशिताग्रा
तदातप्स्यस्यर्ज्जुनस्यानुयोगात् १४

राम०
८०

म१

१५ भोगीसर्पः पातेपतनार्थं २३ पर्मीनेरासमेनापुतं कृष्णापुतं त्रलवः वाङ्कमामितर्पः २४ दुंदुभि ग्रीवंदुंदुभिस्वनकंठं २५ ॥ ॥

पदादिवंधनुरादायपार्थः प्रतापयन्पृजनांसम्यसाची त्वांमर्दयिष्यन्तिशितैः पृषत्कैर्हीदापञ्चात्रमसेसहनपुत्र १५ बालश्चंद्रमा
तुरंङ्केशपानोपपाकच्छिन्नार्पीपतेपहँन्तुं नहन्मोहापोतमानेरण्यस्थंसंप्राप्यपसज्ञ्जेनेजतमघ १६ त्रिमूलमाश्रित्यसहनौस्त्रा
धारेसर्वाणिगात्राणिनिधर्षसितं सुतीक्ष्णाधारोपनकर्मणालेपुपुत्रसेयोऽर्जुनेनापकर्णा १७ क्रुद्धंसिंहंकेशरिणंहन्तुंमंसेवालो
मूढः क्षुद्रमृगाकारस्त्वो समाक्षेपेत्रद्वदेतत्नवाघसमाद्गानेसतपुत्राऽर्जुनसम १८ मास्तनपुत्राद्वपराजपुत्रेमहावीर्यंकेसरिणांप
थैव वनेमृगालः पिशितिनत्तमोमापार्थमासाघविनंक्ष्यसितं ईषादंतंमहानागंप्रभिन्नकरटामुखं शशकोद्धयसेपुंदेकरीणापा
र्थंधनंजयं २० विलस्थंकृष्णसर्पंत्वंबाल्यात्काष्ठेनविध्यसि महाविषंस्पर्शकोपंपपत्सार्थयोद्धुमिच्छसि २१ सिंहंकेसरिणांक्रुद्धम
तिक्रम्याभिनर्दसे मृगालइवमूढस्त्वंनसिंहंकरीणांपाउवं २२ सुपर्णंपतगश्रेष्ठंवैनतेयंतरस्विनं भोगीवाह्वयसेपातेकरीणापार्थंध
नंजयं २३ सर्वाम्भसांनिधिंभीमंमत्स्यंनक्रनिषेवितं पापुतं चंद्रोदयेविवर्धतमपवलवःसन्तितीर्षसि २४ ऋषभंदुंदुभिग्रीवंतीक्ष्णशृंगंप्र
हारिणं वत्सआह्वयसेयुद्धेकरीणापार्थंधनंजयं २५ ॥ ॥ ॥ ॥ ॥

म२

क० ८१

३६ ३५ एकोनचत्वारिंशः अधि वाक्शल्यत्वादेवायंशल्यनामेतिनिम्बिन्वन १

महामेघंमहाघोरंदुर्दुरः प्रतिनर्दसि कामतोयप्रदंलोकेनरपर्ज्जन्यमर्ज्जुनं २६ यथाचस्वगृहस्थःश्वाव्याघ्रंवनगतंभवेत् तथात्वंभष
सेकर्णानरव्याघ्रंधनंजयं २७ शृगालोपिवनेकर्णाशशैःपरिवृतोवसन् मन्यतेसिंहमात्मानंयावत्सिंहंनपश्यति २८ तथात्वमपिराधे
यसिंहमात्मानमिच्छसि अपश्यन्शत्रुदमनंनरव्याघ्रंधनंजयं २९ व्याघ्रंत्वमन्यसेत्मानंयावत्कृष्णौनपश्यसि समास्थितावेकरथे
सूर्याचंद्रमसाविव ३० यावद्गांडीवघोषंत्वंनशृणोषिमहाहवे तावदेवत्वयाकर्णशक्यंवक्तुंयथेछसि ३१ रथशब्दधनुःशब्दै
र्नादयंतंदिशोदश नर्दंतमिवशार्दूलंदृष्ट्वाक्रोष्टाभविष्यसि ३२ नित्यमेवशृगालस्त्वंनित्यंसिंहोधनंजयः वीरप्रद्वेषणान्मूढतस्मा
त्क्रोष्टेवलक्ष्यसे ३३ यथाखुःस्याद्बिडालश्चश्वाव्याघ्रश्चबलाबले यथाशृगालःसिंहश्चयथाचशशकुंजरौ ३४ यथानृतंचसत्यं
चयथाचापिविषामृतं तथात्वमपिपार्थश्चप्रख्यातावात्मकर्मभिः ३५ इतिश्रीकर्णपर्वणिकर्णशल्यसंवादे संजयउवाच अ
धिक्षिप्तस्तुराधेयःशल्येनामिततेजसा शल्यमाहसुसंक्रुद्धोवाक्शल्यमवधारयन् १ ॥ ॥ ॥ ॥

गम० ८१

२ आहेयः सर्पमयः ८ नास्येयं तक्षिपेयं १२ सुजातं शोभनं जन्म १३ ॥

कर्णउवाच गुणान्गुणान्कांश्चिच्छल्यगुणवान्वेत्तिनागुणः त्वंतुशल्यगुणैर्हीनः किंज्ञास्यसिगुणागुणं २ अर्जुनस्य
महास्त्राणिक्रोधंवीर्यंधनुःशरान् अहंशल्याभिजानामिविक्रमंचमहात्मनः ३ तथाकृष्णस्यमाहात्म्यमृषभस्यमहीक्षितां
यथाहंशल्यजानामिनत्वंजानासितत्तथा ४ एवमेवात्मनोवीर्यमहंवीर्यंचपांडवे जानन्नेवाह्वयेयुद्धेशल्यगांडीवधारिणं ५ अस्तिचा
यमिषुःशल्यसुपुंखोरक्तभोजनः एकतूणीशयःपत्रीसुधौतःसमलंकृतः ६ शेतेचंदनपूर्णेषुपूजितोवहुलाःसमाः आहेयो
विषवानुग्रोनराश्वद्विपसंघहा ७ घोररूपोमहारौद्रस्तनुत्रास्थिविदारणः निर्भिंद्यांयेनरुष्टोहमपिमेरुंमहागिरिं ८ न
महंजातुनास्येयमन्यस्मिन्फाल्गुनादृते कृष्णाद्वादेवकीपुत्रात्सत्यंचाप्यत्रशृणुमे ९ तेनाहमिषुणाशल्यवासुदेवधनंजयौ
योत्स्येपरमसंक्रुद्धस्तत्कर्मसदृशंमम १० सर्वेषांवृष्णिवीराणांकृष्णेलक्ष्मीःप्रतिष्ठिता सर्वेषांपांडुपुत्राणांजयःपार्थेप्रतिष्ठितः
११ उभयंतत्समासाद्यकोनिवर्त्तितुमर्हति तावेतौपुरुषव्याघ्रौसमेतौस्यंदनेस्थितौ १२ मामेकमभिसंयातौसुजातंपश्य
शल्यमे पितृष्वसामातुलजौभ्रातरावपराजितौ १३ ॥

क०
८२

प्रीतौ रक्तसूत्रेमणीइवप्रेमसंबद्धौ १४ आमजननेद्द्यतिमम दापापेक्षपाप्मानात्मेननिर्दिशः १९ जोषंतत्संत्री च्यासनिष्ठ क्रीडागतः लीलयाआगतः २३

मणीसूत्रइवप्रोतौतौद्वाभिनिहंतोमया अर्जुनेगांडिवंकस्ते चक्रंतार्क्ष्यकपिध्वजौ १४ भीरूणांआमजननेशल्यहर्षकरं
मम त्वंतदुष्करकृतिर्न्नतोमहायुद्धेषुकोविदः १५ मयावदीर्णःसंत्रासादवद्वंबहुभाषसे संक्रोषितोतुकेनापिहेतुनात्वं
कुदेशज १६ तौहत्वासमरेहंतात्वामघसहबांधवं पापदेशजदुर्बुद्धेक्षुद्रक्षत्रियपांसन १७ सुहृन्भूत्वारिपुःकिंमांकृत्स्नामो
भीषयिष्यसि तौवामामघंहत्वारोहनिष्येवापितावहं १८ नाहंबिभेमिकृष्णाभ्यांविजानन्नात्मनोबलं वासुदेवसहस्रंवाफाल्गुना
नांशतानिवा १९ अहमेकोहनिष्यामिजोषमास्स्वकुदेशज स्त्रियोबालाश्चवृद्धाश्चप्रायः क्रीडागताजनाः २० याःगाथाःसंप्र
गायंतिकुर्वंतोध्ययनेयथा ताःगाथाःश्रणुमेशल्यमद्रकेषुदुरात्मसु २१ ब्राह्मणैःकथिताःपूर्वंयथावद्राजसंनिधौ श्रुत्वाचैक
मनाःमूढक्षमवाब्रूहिचोत्तरं २२ मित्रध्रुक्मद्रकोनित्यंयोनोद्वेष्टिसमद्रकः मद्रकेसंगतंनास्तिक्षुद्रवाक्येनराधमे २३ दुरात्मा
मद्रकोनित्यंनित्यमानृतिकोनृजुः यावदंतंहिदौरात्म्यंमद्रकेष्वितिनःश्रुतं २४ ॥ ॥ ॥ ॥

मद्रकेषुकुत्सितेषुमद्रदेशेषु अनेनेनचरतीत्यानृतिकः यावदंतं आमरणपर्यंतंमरणावधीतिवा २४ ॥ ॥

राम०
८२

ख१

२५ पुंभिः पुंभिः विमिश्राः संगताः इच्छया मैथुनिनः अश्नाति [illegible] ज्ञाताज्ञाश्चपाविगीताश्चसर्पाः २६ येषां मद्रकाणां सक्तुमिश्रितमन्नमाशितं स्त्रीक्षुमध
२९ मद्रकेषु संसृष्टं नष्टं एवं [illegible] गांधारकेषु शौचं नष्टं भवेत् ३० राजा याजकोपसतस्मिन्नाम्येहनिष्टं भवेत् ३१ ये पैवेति यथा मद्रकैः संगतं कृत्वा पतति यथा

पितापुत्रश्वमाताचश्वश्रूश्वशुरमातुलाः जामाताद्दुहिताभ्रातानप्तानेतिचबांधवाः २५ वयस्याभ्यागताश्चान्येदासीदासंचसंगतं
पुंभिर्विमिश्रानार्यश्चज्ञाताज्ञाताः स्वेच्छया २६ येषांगृहेषुशिष्टानांसक्तुमत्स्याशिनांतथा पीत्वासीधुसगोमांसंक्रंदंतिचहसं
तिच २७ गायंतिचाप्यबद्धानिप्रवर्तंतेचकामतः कामप्रलापिनोन्योन्यंतेषुधर्मः कथंभवेत् २८ मद्रकेषुविलिसेषुप्रख्याताःसुभ
कर्मसु नापिवैरंनसौहार्दंमद्रकेषुसमाचरेत् २९ मद्रकेसंगतंनास्तिमद्रकोहिसदामलः मद्रकेषुचसंसृष्टंशौचंगांधारकेषु
च ३० राजयाजकयाज्येचनष्टंदत्तंहविर्भवेत् शूद्रसंस्कारकोविप्रोयथायातिपराभवं ३१ तथाब्रह्मद्विषोनित्यंगच्छंतीहपराभ
वं तेष्वेवसंगतंकृत्वानरः पततिमद्रकैः ३२ मद्रकेसंगतंनास्तिहतंवृश्चिकतोविषं अथर्वणेनमंत्रेणयथाशांतिःकृतामया
३३ इतिवृश्चिकदष्टस्यविषवेगहतस्यच कुर्वंतिभेषजंप्राज्ञाः संमंत्रंचापिहस्यते ३४ एवंविद्वन्जोषमास्वमृणुवा[illegible]तरं श्रो ३
वचः वासांसितस्कराःनमस्यंतिस्त्रियोयामघोषाहिता ३५ मेपुनःसंपन्नाश्चापियथाकामचराश्चताः तासांपुत्रः कथंधर्मंमद्रकोव
वामद्रकेसंगतंनास्तिहेवृश्चिकतथातेनविषंहतं येचनतस्सुतर्हिनचविषंनशाम्यतितिमंत्रेणसर्वथाविषंनश्यतीत्यसर्पैःमहेत्यानुभव ॥ वक्तुमर्हति ३६
सिद्ध[illegible]दमितिघातयति ३५ यथाकामचर्यंतेताः असंयताइतिछंदः ३६ ॥

सि२

क॰
८३

तासांपुत्रः संकरजातः स्मर्यः प्रमेहंति मूत्रयंते दसेरकाः गर्दभाः ३७ सुवीरकं कांजिकं स्फिचौ कटिप्रोथौ ३८ निह्रीकाः निर्लज्जाः घस्मराः बहुभक्षकाः ४१

यास्तिष्ठंत्यः प्रमेहंति यथैवोष्ट्रदसेरकाः तासांविभ्रष्टधर्माणांनिर्लज्जानांततस्ततः ३७ त्वंपुत्रस्तादृशीनांहिधर्मंवक्तुमिहेच्छसि सुवीरकंयाच्यमानामद्रिकाकर्षतिस्फिचौ ३८ अदातुकामावचनमिदंवदतिदारुणं मामांसुवीरकंकश्चिद्याचतांदयितंमम ३९ पुत्रंदद्यांप्रतिपदंनतुदद्यांसुवीरकं गौर्योबृहत्योनिर्ह्रीकामद्रिकाः कंबलावृताः ४० घस्मरानष्टशौचाश्चप्रायइत्यनुशुश्रुम एवमादिमयान्यैर्वाशक्यंवक्तुंभवेद्बहु ४१ आकेशाग्रान्नखाग्राच्चवक्तव्येषुकुकर्मसु मद्रकाःसिंधुसौवीराः धर्मंविद्युःकथंत्विह ४२ पापदेशोद्भवाम्लेच्छाधर्माणामविचक्षणाः एषमुख्यतमोधर्मः क्षत्रियस्येतिनःश्रुतं ४३ यदाजौनिहतःशेतेसद्भिःसमभिपूजितः आयुधानांसंपरायेयन्मुच्येयमहंततः ४४ नमेसप्रथमःकल्पोनिधनेस्वर्गमिच्छतः सोहंप्रियःसखाचास्मिधार्तराष्ट्रस्यधीमतः ४५ तदर्थेहिममप्राणायच्चमेविद्यतेवसु व्यक्तंत्वमप्युपहितःपांडवैःपापदेशज ४६ यथाचामित्रवत्सर्वंत्वमस्मासुप्रवर्तसे कामंनखलुशक्योहंत्वद्विधानांशतैरपि ४७ संग्रामाद्विमुखःकर्तुंधर्मज्ञइवनास्तिकैः सारंगइवघर्मार्तःकामंविलपशुष्यच ४८ नाहंभीषयितुंशक्यःक्षत्रवृत्तेव्यवस्थितः तनुत्यजांनृसिंहानामाहवेष्वनिवर्तिनां ४९ ॥ ॥ टि ॥

वक्तव्येषुगर्हणीयेषु ४२ संपरायेसन्देहसंग्रामेइत्यर्थः मुच्येतजीवितमितिशेषः ४५ उपहितःउपजप्तः ४६ ४७ ४९ ॥ ॥

राम॰
८३

तेषांधार्त्तराष्ट्राणां ५० हत्वाअर्ज्जुनेनघातयित्वामित्रप्रतीक्ष्यामित्रकार्यविक्षेपेणनचात्दुर्योधनस्यनयोरेवोभयोः ५३ अपवादेनिंदातितिक्षा

यागतिर्गुरुणाप्रोक्तापुरारामेणतांस्मरे तेषांत्राणार्थमुद्यंतंवधार्थंद्विषतामपि ५० विद्धिमामास्थितंवृत्तंपौरुस्त्वसमन्नमे
नतस्थतंप्रपश्यामित्रिषुलोकेषुमद्रप ५१ योमामस्मादभिप्रायाद्वारयेदितिमेमतिः एवंविद्वन्नजोषमास्वत्रासात्किंबहुभाषसे
५२ नत्वांहत्वाप्रदास्यामिक्रव्याद्भ्योमद्रकाधम मित्रप्रतीक्षयाशल्यधार्त्तराष्ट्रस्यचोभयोः ५३ अपवादतितिक्षाभिस्त्रि
भिरेतैर्हिजीवसि पुनश्चेदीदृशंवाक्यंमद्रराजवदिष्यसि ५४ शिरस्तेपातयिष्यामिगदयावज्रकल्पया श्रोतारस्त्विद
मेघहद्रक्ष्यंतिवाकुदेशज ५५ कर्णंवाजघ्नतुःकृष्णौकर्णोवानिजघानतौ एवमुक्त्वातुराधेयःपुनरेवविशांपते ५६ अब्रवी
न्मद्रराजानंयाहियाहीत्यसंभ्रमं ५७ इतिकर्णपर्वणिमद्राधिपसंवादे संजयउवाच मारिषाधिरथेःश्रुत्वावाचोयुद्धाभिनंदि
नः शल्योब्रवीत्पुनःकर्णंनिदर्शनमिदंवचः १ जातोहंयज्वनांवंशेसंग्रामेष्वनिवर्त्तिनां राज्ञांमूर्द्धाभिषिक्तानांस्वयंधर्मपराय
णः २ यथैवमत्तोमद्येनत्वंतथालक्ष्यसेवृष तथाद्यत्वांप्रमाद्यंतंचिकित्सेयंसुहृत्तया ३ इमांकाकोपमांकर्णप्रोच्यमानांनिबो
धमे श्रुत्वायथेष्टंकुर्यास्त्वंनिहीनकुलपांसन ४ ॥

चैतैःत्रिभिर्हेतुभिः ५४ ५७ चत्वारिंशःमारिषहेराजन् १२ वृषःमहोक्षः ३ ४ ४ ॥ ॥

७ आयुधस्यास्तिनेवेतिज्ञानं रुतं जयपराजयसूचकं अतिभारो दुर्वहत्वं ८ निमित्तानि दिव्यान्तरिक्षभौमानि ग्राह्यानुकूल्यप्रातिकूल्यादीनि ९ निद

नाहमात्मनि किंचिद्वै किल्बिषं कर्ण संस्मरे येन मां त्वं महाबाहो हंतुमिच्छस्यनागसं ५ अवश्यं तु मया वाच्यं बुध्यता त्वद्धिताहितं विशे
षतो रथस्थेन राज्ञश्चैव हितैषिणा ६ समं च विषमं चैव रथिनश्च बलाबलं श्रमः खेदश्च सततं हयानां रथिना सह ७ आयुधस्य
परिज्ञानं रुतं च मृगपक्षिणां भारश्चाप्यतिभारश्च शल्यानां च प्रतिक्रिया ८ अस्त्रयोगश्च युद्धं च निमित्तानि तथैव च स
र्वमेतन्मया ज्ञेयं रथस्यास्य कुटुंबिना ९ अतस्त्वां कथये कर्ण निदर्शनमिदं पुनः वैश्यः किल समुद्रांते प्रभूतधनधान्यवान्
१० यज्वा दानपतिः क्षांतः स्वकर्मस्थोभवच्छुचिः बहुपुत्रः प्रियापत्यः सर्वभूतानुकंपकः ११ राज्ञो धर्मप्रधानस्य राष्ट्रे व
सति निर्भयः पुत्राणां तस्य बालानां कुमाराणां यशस्विनां १२ काको बहूनामभवदुच्छिष्टकृतभोजनः तस्मै सदा प्रयच्छंति
वैश्यपुत्राः कुमारकाः १३ मांसोदनं दधि क्षीरं पायसं मधुसर्पिषी स चोच्छिष्टभृतः काको वैश्यपुत्रैः कुमारकैः १४ सदृशान्प
क्षिणो दृप्तः श्रेयसश्चाधिचिक्षिपे अथ हंसाः समुद्रांते कदाचिदतिपातिनः १५ गरुडस्य गतौ तुल्याश्चक्रांगा हृष्टचेतसः कु
मारकास्ततो हंसान्दृष्ट्वा काकमथाब्रुवन् १६ ॥

र्शनं दृष्टांतः १० १४ अतिपातिनः गमनातिशयगामिनः १५ चक्रांगाः मानसचारिणः १६ ॥

पतत्रिभ्योन्येभ्यः प्रतापयमाणोन्यथाप्रतापयमानः १७ श्रेष्ठमात्कृतेश्रेष्ठंअंगंगमजने १९ पताव्ःगच्छावः २१ दूरपातेनदूरागमनेन २२ पतितापतिष्यामि

भवानेवविशिष्टोहिपतत्रिभ्योविहंगम प्रतापयमाणास्तैः सर्वैरल्पबुद्धिभिरंडजः १७ तद्वचः सत्यमित्येवमौर्ख्याद्दर्पाच्चमन्यते तान्सोभिपत्यजिज्ञासुः कस्तेषांश्रेष्ठभागिति १८ उच्छिष्टदर्पितः काकोबहूनांदूरपातिनां तेषांमध्यवरंमेनेहंसानांदूरपातिनां १९ तमाह्वयतदुर्बुद्धिः पतावइतिपक्षिणां तच्छ्रुत्वाप्राहसन्हंसायेतत्रासन्समागताः २० भाषतोबहुकाकस्यबलिनः पततांवराः इदमूचुः स्मचक्रांगावचः काकविहंगमाः २१ हंसाऊचुः वयंहंसाश्चरामेमांपृथिवींमानसौकसः पक्षिणांचवयंनित्यंदूरपातेनपूजिताः २२ कथंनहंसंबलिनंचक्रांगंदूरपातिनं काकोभूत्वानिपतनेसमाह्वयसिदुर्मते २३ कथंत्वंपतिताकाकसहास्माभिर्ब्रवीहितत् अथहंसवचोमूढःकुत्सयित्वापुनःपुनः २४ प्रजगादोत्तरंकाकः कत्थनोजातिलाघवात् काकउवाच शतमेकंचपातानांपतितास्मिनसंशयः २५ शतयोजनमेकैकंविचित्रंविविधंतथा २६ ॥

कत्थनः गुणश्लाघी २४ पतितास्मिपतिष्यामि २५ ॥ ॥ ॥ ॥ ॥ ॥

म१ टी१

का॰ २६

पातानां शतमेकं गणयति उड्डीनमूर्ध्वगमनं [illegible] अवडीनमधोगतिः प्रडीनं सर्वतोपातं डीनं गमनमात्रकं निडीनं शयनं कैश्चित्संडीनं ललितं गतं तिर्य[illegible]डीनं गतं प्राङ्स्तिरश्चरणं बुधाः नानाशाखाभेदभिन्नानि चत्वारि प्रतिजानते तानि निर्यक्डीनानि २६ विडंबितं विडीनं स्यात् परिडीनं तु सर्वतः पश्चाद्गतिः पराडीनं स्वर्गमार्गं सुडीनकं आभिमुख्येन गमनमभिडीनं प्रचक्षते पातं महाडीनमाहुः पवि[illegible]क्रा डितं गतिं नडीनं निश्चलं पातं प्रचंडमतिडीनकं विडंबितं मल्लवद्ड्डीयोड्डीपगमनं २७ अवरोहावडीनं स्यात् प्रडीनं चित्रमुच्यते गत्वा ललितया पूर्वमुपक्रम्य समंततः परिक्रम्य प्रपतनं संडीनोड्डीन[illegible]डीनकं संडीनो

उड्डीनमवडीनं च प्रडीनं डीनमेव च निडीनमथ संडीनं तिर्यग्डीनगतानि च २६ विडीनं परिडीनं च पराडीनं सुडीनकं अतिडीनं महाडीनं खडीनं परिडीनकं २७ अवडीनं प्रडीनं च संडीनं डीनडीनकं विडीनोड्डीनं संडीनं पुनर्डीनं विडीनकं २८ संपातं समुद्दीपं च ततोऽन्यद्व्यतिरिक्तकं गतागतं प्रतिगतं बह्वीस्वत कुलीनकाः २९ ॥ ॥

ड्डीनडीनं स्यात्तद्देवोर्ध्वप्रकल्पनात् गत्वा गत्वं तत्रोद्धेहो भवेड्डीनविडीनकं २८ सरणात्संगत्य निष्क्रम्य पक्षसंपातमुच्यते उड्डीय गति संबंधः समुद्दीपं प्रचक्षते संकल्प्य पश्चाद्गमनमुच्यते व्यतिरिक्तकं षड्विंशतिरमी मेलः पातानामिह दर्शिताः महाडीनं विहायैषां पातानां त्रिविधा गतिः गतं पुनरागमः प्रत्यावृत्तिः प्रतिगतिरिति षट्सं[illegible]तिः स्मृताः तेषां निपाताः कथ्यन्ते प्रत्येकं पंचविंशतिः नकुलीनकाः निपाताः २९ ॥ ॥

राम॰ २६

प्र३

मिषतां पश्यतां ३० केन पातेन ३१ पतध्वं नेति शिरःस्वालनेन किं न पतध्वमपि तु पतध्वमेवेति काकूक्त्या परिहासः संपतध्वमिति वा पाठः ३३ एकं सु

कतीस्मिन्मिषतां वो घ्नतो द्रक्ष्यथ मे बलं तेषामन्यतमेनाहं पतिष्यामि विहायसा ३० प्रदिशध्वं यथान्यायं केन हंसाः प
ताम्यहं तेनैव युष्मद्विनिर्दिष्टेन पतध्वं तु मया सह ३१ पातैरेभिः खलु खगाः पतितुं खे निराभ्रेप एवमुक्ते तु काकेन प्रहसन्स को
विहंगमः ३२ उवाच काकं राधेय वचनं तन्निबोध मे हंस उवाच शतमेकं च पातानां त्वं काक पतिता ध्रुवं ३३ एकमेव तु यं सा
र्वे विदुः सर्वे विहंगमाः तमहं पतिता काक नान्यं जानामि कंचन ३४ पत त्वमपि ताम्राक्ष येन पातेन मन्यसे अथ काकाः प्रज
हसुर्ये तत्रासन्समागताः ३५ कथमेकेन पातेन हंसः पातशतं जयेत् एकेनैव शतस्यैष पातेनाभिपतिष्यति ३६ हंसस्य पति
तं काको बलवानाशुविक्रमः प्रपेततुः स्पर्धयाथ ततस्तौ हंसवायसौ ३७ एकपाती च चक्रांगः काकः पातशतेन च पतिता चा
पि चक्रांगः पतितावाथ वायसः ३८ विस्मापयिषुः पातैराचक्षाणो ऽऽत्मनः क्रियाः अथ काकस्य चित्राणि पतितानि मुहु
र्मुहुः दृष्ट्वा प्रमुदिताः काका विनेदुरधिकैः स्वरैः हंसांश्चावहसन्ति स्म प्रावदन्नप्रियाणि च उत्पत्योत्पत्य च प्राक् मुहूर्तमिति च
ति च ३९ वृक्षाग्रेभ्यः स्थलेभ्यश्च निपतन्त्युत्पतन्ति च ४१

स्थं ३५ एकेन पातेन ३६ ३७ ३८ ३९ ४० ४१ ॥

का० ८७

४२ इदमब्रुवन्काकास्तस्यर्थात ४६ नभसश्चाकाशात ४७ गांभीर्यात्गहनत्वात्दिगंबरांभसः दिशराकवरांपसतादृशमंभोपसेत्याकाशेपमासमुद्र

कुर्वाणाविविधान्त्कादानाशंसंतोजयंतथा हंसस्तन्दृष्ट्वैनकेविक्रांतमुपचक्रमे ४२ प्रत्यहीयतकाकाश्चसमुद्रेनमिवमारिष अवमन्य
चहंसास्तान्काकंवचनमब्रुवन ४३ योसावुत्पतितोहंसः सोसावेवप्रहीयते अथहंसः सतच्छ्रुत्वाप्रापतत्पश्चिमांदिशं ४४ उपर्युपरि
वेगेनसागरंमकरालयं ततोभीः प्राविशत्काकंतदातत्रविचेतसं ४५ द्वीपद्रुमानपश्यंतंनिपातार्थेश्रमान्वितं निपतेयक्कनुश्रांतइतितस्
स्मिनजलार्णवे ४६ अविषह्यः समुद्रोहिबहुसत्वगणालयः महासत्वशतोद्भासीनभसोपिविशिष्यते ४७ गांभीर्याद्धिसमुद्रस्य
नविशेषंहिसूतज दिगंबरांभसांकर्णीसमुद्रस्यविदुर्जनाः ४८ विदूरपातात्तोयस्यकिंपुनःकर्णावायसः अथहंसोभ्यतिक्रम्यमुहू
र्तमितिचेतिच ४९ अवेक्षमाणस्तंकाकंनाशकद्ध्यपकर्षितुं अतिक्रम्यचचक्रांगः काकंतंसमुदैक्षत ५० यावद्गलापतत्पश्च
काकोमामितिचिंतयन् ततःकाकोभृशंश्रांतोहंसमभ्यागमत्तदा ५१ तंतथाहीयमानंतुहंसोदृष्ट्वाब्रवीदिदं उज्जिहीर्षुर्निमज्जंतं
स्मरन्सत्पुरुषव्रतं ५२ हंसउवाच बहूनिपतितानित्वमाचक्षाणोमुहुर्मुहुः पातस्याहरस्वेदनमागुह्यंप्रभाषसे ५३ ॥

समंवधिनस्तोयस्य ४९ अपसर्पितुंत्यक्तागंतुंदयावशात्तान्नाशकत ५० मामनुलस्येतिशेषः ५१ ५२ ५३ ॥ ॥

राम० ८७

५५ दुष्टात्मन्निति करोसिसंबोधनं ५७ काकवाशिकाः काकाइतिवाशंतःशब्दंकुर्वतः ६१ [illegible]नंआत्मानं ६२ ६३ ६४

किंनामपतितंकाकयंत्वंपतसिसांप्रतं जलंस्पृशसिपक्षाभ्यांतुंडेनचपुनःपुनः ५४ प्रब्रूहिकतमेनत्रपातेनवर्त्तसेवायस एहेहि काकशीघ्रंत्वमेषत्वांप्रतिपालये ५५ शल्यउवाच सपक्षाभ्यांस्पृशन्नार्त्तस्तुंडेनचजलंतदा दृष्टोहंसेनदुष्टात्मन्निदंहंसंततोब्रवीत ५६ अपश्यन्नंभसःपारंनिपतंश्चश्रमान्वितः पातवेगप्रमथितोहंसंकाकोब्रवीदिदं ५७ वयंकाकाहृतोनामचरामःकाकजान्वयाः हंसप्राणैःप्रपद्येत्वामुदकांतंनयस्वमां ५८ सपक्षाभ्यांस्पृशन्नार्त्तस्तुंडेनचमहार्णवे काकोद्दृढंपरिश्रांतःसहसानिपपातह ५९ सागरांभसितंदृष्ट्वापतितंदीनचेतसं म्रियमाणमिदंकाकंहंसोवाक्यमुवाचह ६० शतमेकंचपातानांपतनाम्यहमनुस्मर श्लाघमानस्त्वमात्मानंकाकभाषितवानसि ६१ सत्वमेकशतंपातंपतन्नभ्यधिकोमया कथमेवंपरिश्रांतःपतितोसिमहार्णवे ६२ प्रत्युवाचततःकाकःसीदमानइदंवचः उपरिष्टंतदाहंसमभिवीक्ष्यप्रसादयन ६३ काकउवाच उच्छिष्टदर्पितोहंसमन्येत्मानंसुपर्णवत अवमन्यबहूंश्चाहंकाकानन्यांश्चपक्षिणः ६४ प्राणैर्हंसप्रपद्येत्वांद्वीपांतंप्रापयस्वमां य द्यहंस्वस्तिमान्हंसस्वंदेशंप्राप्नुयांविभो ६५

क° ८८

नकंचिदवमन्येहमापदेयंमामसमुद्धर तमेवंवादिनंदीनंविलपंतमचेतनं ६६ काककाकेतिवाशंतंनिमज्जंतंमहार्णवे हंसपादाद्यहंसस्तंजल
क्लिन्नंसुदुर्द्दशं ६७ पद्भ्यामुत्क्षिप्यवेगेनपृष्ठमारोपयच्छनैः आरोप्यपृष्ठंहंसस्तंकाकंत्वरितविचेतनं ६८ आजगामपुनर्द्वीपंस्पर्धया
पेततुर्यतः संस्थाप्यतंचापिपुनःसमाश्वास्यचखेचरं ६९ गतोयथेप्सितंदेशंहंसोमनइवाशुगः एवमुच्छिष्टपुष्टःसकाकोहंसपरा
जितः ७० बलंवीर्यमहत्कर्णत्यक्त्वाक्षांतिमुपागतः उच्छिष्टभोजनःकाकोयथावैश्यकुलेपुरा ७१ एवंत्वमुच्छिष्टभृतोधार्तराष्ट्रैनसंश
यः सदृशान्श्रेयसश्चापिसर्वान्कर्णावमन्यसे ७२ द्रोणद्रौणिकृपैर्गुप्तोभीष्मेणान्यैश्चकौरवैः विराटनगरेपार्थमेकंकिंनावधीस्त
दा ७३ यत्रव्यस्ताःसमस्ताश्चनिर्जिताःस्थकिरीटिना सृगालाइवसिंहेनक्वतेवीर्यमभूत्तदा ७४ भ्रातरंनिहतंदृष्ट्वासमरेसव्यसा
चिना पश्यतांकुरुवीराणांप्रथमंत्वंपलायितः ७५ तथाद्वैतवनेकर्णगंधर्वैःसमभिद्रुतः कुरून्समग्रानुत्सृज्यप्रथमंत्वंपलायितः ॥
७६ हत्वाजित्वाचगंधर्वांश्चित्रसेनमुखान्रणे कर्णदुर्योधनंपार्थःसभार्यंसममोक्षयत् ७७ ॥ ॥

राम° ८८

पुनः प्रभावः पार्थस्य पौरुषाणि केशवस्य च कथितः कर्णरामेण सभायां राजसंसदि ७८ स तत्तं च त्वमश्रौषीर्वचनं द्रोणभीष्मयोः त्व
वध्योवदतः कृष्णौ सन्निधौ च महीक्षितां ७९ कियंतं तत्र वक्ष्यामि येन येन धनंजयः त्वत्तोतिरिक्तः सर्वेभ्यो भूतेभ्यो ब्राह्मणो यथा ८०
इदानीमेव द्रक्ष्यसि प्रधाने स्यंदने स्थितौ पुत्रं च वसुदेवस्य कुंतीपुत्रं च पांडवं ८१ यथाश्रयसि चक्रांगं वायसो बुद्धिमास्थितः तथाश्र
यस्व वार्ष्णेयं पांडवं च धनंजयं ८२ यदा त्वं युधि विक्रांतौ वासुदेवधनंजयौ द्रष्टासि एकरथे कर्ण तदा नैवं वदिष्यसि ८३ यदा शरशतैः
पार्थो दर्पं तव वधिष्यति तथा त्वमंतरं द्रष्टा त्वात्मनः फाल्गुनस्य च ८४ देवासुरमनुष्येषु प्रख्यातौ यौ नरोत्तमौ तौ मावमंस्थामो
र्ख्यातं खद्योत इव रोचनौ ८५ सूर्याचंद्रमसौ यद्वत्तद्वदर्ज्जुनकेशवौ प्राकाश्येनाभिविख्यातौ त्वं तु खद्योतवन्नृषु ८६ एवं वि
द्वन्मावमंस्थाः सूतपुत्राच्युतार्ज्जुनौ नृसिंहौ तौ महात्मानौ जोषमास्स्व विकत्थसे ८७ इति श्रीमहाभारते कर्णपर्वणि कर्णशल्यसं
वादे हंसकाकीयोपाख्यानं संजय उवाच मद्राधिपस्याधिरथिर्महात्मा वचो निशम्याप्रियमप्रतीतः उवाच शल्यं विदितं ममैतद्यथा
विधावर्ज्जुनवासुदेवौ १ ॥

क० ८९

५ चलितवानचलितवान् ७ स्ततोपधीभूतत्वधिधाननिमित्तं कर्मकालेसप्रतिज्ञारक्षणकाले ८ पर्याप्तंसमाप्तंविसृतमित्यर्थः १० दमर

शौरिरपंबाहुपतोर्ज्जुनस्यबलंमहास्त्राणिचपांडवस्य अहंहिविजानामियथावदद्यपरोक्षभूतंतवतन्नुशल्य २ तौचाप्यहंशल्यमतांवरिष्ठौव्यपेतभीर्योधयिष्यामिकृष्णौ संतापयत्यभ्यधिकंतुरामाच्छापोयथमांब्राह्मणसत्तमाच्च ३ अवसंवैब्राह्मणरूपेणाहंरामेपुरादिव्यमस्त्रंचिकीर्षुः तत्रापिमेदेवराजेनविघ्नोहितार्थिनाफाल्गुनस्यैवशल्य ४ कृतोविभेदेनममोरुमेत्यप्रविश्यकीटस्यतनुंविरूपां ममोरुमेत्यप्रविभेदकीटः सुप्तेगुरौतत्रशिरोनिधाय ५ ऊरुप्रभेदाच्चमहान्बभूवशरीरतोमेघनशोणितौघः गुरोर्भयाच्चापिनचलितवानहंततोविबुद्धोददृशेसविप्रः ६ सधैर्ययुक्तंप्रसमीक्ष्यमांवैनत्वंविप्रःकोसिसत्यंवदेति तस्मैतदात्मानमहंयथावदाख्यातवान्सूतवदेतशल्य ७ समांनिशम्याथमहातपस्वीसंशप्तवान्रोषपरीतचेताः सूतोपधावाप्तमिदंतवास्त्रंनकर्मकालेप्रतिभास्यतित्वां ८ अन्यत्रतस्मात्तवमृत्युकालादब्राह्मणेब्रह्मनहिध्रुवंस्यात् तदद्यपर्याप्तमतीवचास्त्रमस्मिन्संग्रामेतुमुलेतीवभीमे ९ योयंशल्यभरतेषूपपन्नः प्रकर्षणःसर्वहरोतिभीमः सोमिमन्येक्षत्रियाणांप्रवीरान्प्रतापितावलवान्वैविमर्दः ॥ ॥ ॥

राम० ८९

नतोर

अस्त्रंतेनोरामदत्तादस्त्रादन्यत्प्रति रूपन्नंप्रासंअहिंवाराग्यमितिमर्षः १६ सेनांप्रतिरुष्यति १७ अस्त्रैरस्त्राउलैः १९

शल्योग्रधन्वानमहंवीरंतंरस्विनंभीममसह्यवीर्यं सत्यप्रतिज्ञंयुधिपांडवेयंधनंजयंप्रत्युत्पुरुवेनपिष्ये ११ अस्त्रंहिमेतत्प्रतिपन्नमव
येनक्षेप्स्येसमरेशत्रुसंघान् प्रतापिनंबलवंतंकृतास्त्रंतमुग्रधन्वानमितौजसंच १२ क्रूरंमृधेरौद्रममित्रसाहंधनंजयंसंयुगेहंहनि
ष्ये अपांपतिर्वेगवानप्रमेयोनिमज्जयिष्यन्बहुलाःप्रजाश्च १३ महावेगंसंकुरुतेसमुद्रोवेलाचैनंधारयत्यप्रमेयं प्रमुंचंतंवाणा
संघानंतेयान्मर्मछिदोवीरहणःसुपत्रान् १४ कुंतीपुत्रंप्रत्ययोत्स्यामियुद्धेज्याकर्षतामुत्तममद्यलोके सर्वंबलेनातिबलंमहास्त्रं
समुद्रकल्पंसुदुरापमुग्रं १५ शरौघिणांपार्थिवानज्जयंतंवेलेवपार्थमिषुभिःसंसहिष्ये अद्याहवेयस्यनतुल्यमन्यंमन्येमनुष्यंध
नुरादधानं १६ सुरासुरान्वैयुधिवैयोजयेततेनाद्यमेपश्यध्युद्धंसुघोरं अतीवमानीपांडवोयुद्धकामोत्वमानुषैरेष्यतिमेमहास्त्रैः १७
तस्यास्त्रमस्त्रैःप्रतिहत्यसंख्येबाणोत्तमैःपातयिष्यामिपार्थं सहस्ररश्मिप्रतिमंज्वलंतंदिशश्चसर्वाःप्रतपंतमुग्रं १८ तमोनुदंमे
घइवातिमात्रंधनंजयंछादयिष्यामिवाणैः वैश्वानरंधूमशिखंज्वलंतंतेजस्विनंलोकमिमंदहंतं १९ ॥ ॥

क० ९०

२२ खांडवेखांडवस्येह २३ २४ २५ २६ २७ २८ ९२

पर्जन्यभूतः शरवर्षैर्यथाग्निं तथा पार्थं समं निविष्णामि युद्धे प्रमाथिनं बलवंतं प्रहारिणं प्रभंजनं मातरिश्वानमग्रं २० युद्धे सहिष्णुं हि
मवानिवाचलो धनंजयं क्रुद्धमनल्पमाराम् विशारदं रथमार्गेषु शक्तं धुर्यं नित्यं समरेषु प्रवीरं लोके वरं सर्वधनुर्धराणां धनंजयं संयुगे
संसहिष्णुं अद्याहमेव प्रसभं नसुस्मनं तमेनमनुष्यं धनुरादधानं २२ सर्वामिमां यः पृथिवीं विजिग्ये तेन प्रयोद्धास्मि समेत्य संख्ये यः स
र्वभूतानि सदैवकानि प्रस्थेज्जयत्खांडवे सव्यसाची २३ कोन्यो वितं रक्ष्यमाणो हि तेन युयुत्सेद्वै मानुषो मानतेजः मानौ हत्ताक्रः कृत
हस्तो योगी दिव्यास्त्रविच्छ्वेतहयः प्रमाथी २४ तस्याहमद्यातिरथस्य कायाच्छिरो हरिष्यामि शितैः पृषत्कैः योत्स्याम्येनं शल्य धने
जयं यैव मृत्युं पुरस्कृत्य रणे जयं वा २५ अन्यो हि नैहैकरथेन मर्त्यो युध्येत यः पांडवमिंद्रकल्पं तस्याहमेवापौरुषं पांडवस्य ब्रूयां हि
हृष्टः समितौ क्षत्रियाणां २६ किं त्वं मर्षविः प्रसभं मत्स्वचेताम् मम मा वोचः पौरुषं फाल्गुनस्य अप्रियो यः पुरुषो निष्ठुरो हि क्षुद्रः क्षे
प्ता क्षमिणश्चाक्षमावान २७ हन्यामहं तादृशानां शतानि क्षमाम्यहं क्षमया कालयोगात अवोच स्त्वं पांडवार्थे प्रियाणि प्रधर्ष
यन्मां मूढ त्वमापकर्मन् २८ ॥

राम० ९०

अ२ स्प२

आर्जवे कर्त्तव्ये सति २८ अहं सिद्धिं कांक्षमाणोस्मि त्वं तु तन्मन्यसे पुत्रमेकांतं सख्यं नास्ति अस्मत्पक्षो योपन्नत्रैवेह वा न सीत् न अर्थः तदेवाहमित्रमिति
मिंदयति मेदयति वा स्नेहार्द्रं मित्रं मिंदे मिंदे वा मित्रमिति स्मृतं नंदतेरिसं मद्तेरिति पाठः मदी हर्षे इत्यस्य वा रूपं मादयति तर्पयतीति वा मादयतीति मित्रं मिदेग
स्त्रोरणार्थस्य वा मिदेरिदं रूपं नंदयतेः प्रीणयतेः संत्रायते वा पीवर्त्तमानस्य मिदेर्मित्रमिति वार्थः मिनुते मानं करोति सर्वैहितमस्य संगच्छतीति वा मादते स

मयार्जवे जितस्त्वमतिर्हितस्त्वं मित्रद्रोही सा प्रपदं हि मैत्रे कालस्त्वयं प्रत्युपयाति दारुणो दुर्योधनो युद्धमुपागमत्परः २९
अस्माभिः सिद्धिं त्वमिकांक्षमाणस्तन्मन्यसे पक्षेनैकान्तमस्ति मित्रं मिदेर्नन्दतेः प्रीणयतेर्वा संत्रायतेर्मिनुतेर्मोदतेर्वा ३०
तै२ ब्रवीमि सर्वमिदं ममास्ति न चाप्यसर्वं न ममेव चित्रम् राजा शत्रुः शदेः शासतेर्वा शपतेर्वा प्ररोणेर्वा श्वसतेः सीदतेर्वा ३१ उपसर्गा
द्वद्धा स्तुदेः स्वप्नोपगा सर्वं त्वयि तद्वमहो दुर्योधनोऽपि तव च प्रियार्थमपि शोधर्ष[illegible]मात्मार्थमपीश्वरार्थं ३२ ॥

स्नेहेनेति वा मिदे[illegible]तेरर्थः अपि संतीत्यर्थः ३० शत्रुरिति शदेः शातनार्थात् शास्तेः शासनार्थात् शपतेः तनूकरणार्थात् प्ररणाते हिंसार्थात् श्वसतेः
श्चार्थात् सीदतेः विनाशार्थात् सीदतेः स्वदतेर्वा इदं तस्य स्थाने नतालव्यस्योपसंज्ञेनाज्ञ शत्रुरिति शब्द उत्पन्नः तादर्थ्यं च सर्वं त्वदीयमित्यर्थः ३१ दुर्योधनस्याप
चमत्कर्म प्रीतिर्जीयलोभेन यशसे प्राप्तिस्त्रयाणामपि ईश्वरप्रीतिः स्वधर्माचरणेनेत्यर्थः ३२ ॥

ष१ च३ प२

कृ० ८१

अस्त्राणीति कालेस्त्रेन प्रतिभासन्तेति पूर्वमुक्तापि अवशात्वस्य विद्यमानामस्त्रसंपदमभिप्रेत्याह ब्राह्माणि ब्रह्मशिरआदीनि दिव्यानि सं

तस्मादहं पांडव वासुदेवो योऽस्म्यप्रलाप्तकर्मा न नमस्यपेनेघ अस्त्राणि पश्य घननेमेत्रमानि ब्रह्मास्त्राणि दिव्यान्यथ मानुषाणि ३३
अस्मादपि ब्राह्मण महत्तुग्रवीर्याद्विषो द्विषं मन्त्रमिवातिमन्त्रः अस्त्रब्राह्मस्त्रमनसा ततध्येजयं पक्षे स्पोपार्थायायप्रेमेयं जयाय ३४ तेनापि
मैनेव तच्यत युद्धेन चतेन द्विषमनेन ध्वचस्त्रं वैवस्वताद्दृङ्हस्ताद्वरुणाद्वापि पाशिनः ३५ सगदाद्वाधनपतेः सवज्राद्वापि वासवात्
अन्यस्मादपि कस्माच्चिदमित्रात्तापिनः ३६ इति शल्यविजानीहि यथा नाहं विभेम्यतः तस्मान्त्वमेव मे पार्थ ल्लापिचे वजना
र्दनात् ३७ सहमुद्धं हि तेनान्यं तं सोऽपरोयमविष्यति कदाचिद्विजयस्माहमस्त्रे हेनो वहं नृप ३८ अज्ञानाद्विक्षिपन्वाणान्घोर
रूपांश्च यानकान् होमधेन्वा वत्समस्य प्रमत्त इषुणा हतं ३९ चरंतं विजने शल्यतं तो नु व्याजहार मां यस्मात्पापप्रमत्तेन होम
धेन्वा हतः सुतः ४० प्रवृन्नेते पततां चक्रमिति मां ब्राह्मणोऽब्रवीत् युध्यमानस्य संग्रामे प्राप्तस्यैकायनं भयं ४१ तस्माद्विभेमि बल
वद्ब्राह्मणव्याहृतादहं सेते हि सोमराजानईश्वराः सुखदुःखयोः ४२

नै२
द्ब्रवारुणगांधर्वादीनि भौमानि द्विधनुरादीनि ३३ अस्त्राणीति पञ्चपादेहि प्रसिद्धं स्पेनाहिं नैव मुचेतशत्रुः परं तु यदि चक्रं विषमेन पतेदित्यपमिति
द्वितीयादिषोरर्शितः ३८ अहं नैहतवानस्मि ३९ ४० ४१

राम० ८१

४८ समाप्नुहि श्रमघमनुभवस्वेमर्षं ५० द्विचत्वारिंशः ततः अनंतरं शल्येन वक्तव्यं वसंनिवार्य स्वयमेवाह १ २ ३

अदांतस्यैगोसहस्रं बलीवर्दांश्च षट्शतान् प्रसादं न लभे शल्य ब्राह्मणान्मद्रकेश्वर ४३ ईषादंतान्सप्तशतान्दासीदासश
तानिच ददतो द्विजमुख्याय प्रसादं न चकार सः ४४ ततः सानां स्वेतवत्सानां सहस्राणि चतुर्दश आहरन्न लभे तस्मात्प्रसादं
द्विजसत्तमात् ४५ ऋद्धं गृहं सर्वकामैर्यच्च मे वसु किंचन तत्सर्वमस्मै सत्कृत्य प्रयच्छामि न चेच्छति ४६ ततो ब्रवीन्मां याचंतमप
राधं प्रयत्नतः व्याहृतं सूत यन्मे तन्न तथा न तदन्यथा ४७ अनृतोक्तं प्रजा हन्यात्ततः पापमवाप्नुयां तस्माद्धर्माभिरक्षार्थं नानृ
तं वक्तुमुत्सहे ४८ मा त्वं ब्रह्मगतिं हिंस्याः प्रायश्चित्तं कृतं त्वया मद्वाक्यं नानृतं लोके कश्चित्कुर्यात्समाप्नुहि ४९ इत्येतेन
मया प्रोक्तं क्षिप्तेनापि सहत्वया जानामि त्वां विक्षिपंतं जोषमास्स्वोत्तरं शृणु ५० इति श्रीमहाभारते कर्णपर्वणि कर्णशल्य
संवादे संजय उवाच ततः पुनर्महाराज मद्रराजमरिंदमः अभ्यभाषत राधेयः संनिवार्योत्तरं वचः १ यत्त्वं निदर्शनार्थं मां शल्य
जल्पितवानसि नाहं शक्यस्त्वया वाचा विभीषयितुमाहवे २ यदि मां देवताः सर्वा योधयेयुः सवासवाः तथापि मे भयं न स्यात्किं
नु पार्थात्सकेशवात् ३

६ सखिभावः सारथ्येनोपकारकत्वं सौहार्दंमदीयाक्षमा मित्रस्य दुर्योधनस्य भावः इष्टसिद्धिहेतुरित्यर्थः ७ एतदेव त्रयं व्याचष्टे राज्ञश्चेत्यादि

नाहंभीषयितुंशक्योवाङ्मात्रेणाकथंचन अन्यंजानीहियःशक्यस्त्वयाभीषयितुंरणे ४ नीचस्यबलमेतावत्पारुष्यंयत्त्वया त्वयोक्तं अशक्तोमद्गुणान्वक्तुंबल्गसेबहुदुर्मते ५ नहिकर्णःसमुद्भूतोभयार्थमिहमद्रक विक्रमार्थमहंजातोयशोर्थंचतथा त्मनः ६ सखिभावेनसौहार्दान्मित्रभावेनचैवहि कारणैस्त्रिभिरेतैस्त्वंशल्यजीवसिसांप्रतं ७ राज्ञश्चधृतराष्ट्रस्यकार्यंसुमह दुद्यतं मयितच्चाहितंशल्यतेनजीवसिमेक्षणं ८ कृतश्चसमयःपूर्वंक्षंतव्यंविप्रियंतव ऋतेशल्यसहस्रेणविजयेयमहंपरा न् ९ मित्रद्रोहस्तुपापीयानितिजीवसिसांप्रतं १० इतिश्रीमहाभारतेकर्णपर्वणिकर्णशल्यसंवादे शल्यउवाच ननुप्रलापाः कर्णोतेयान्ब्रवीषिपरान्प्रति ऋतेकर्णसहस्रेणशक्याजेतुंपरायुधि १ संजयउवाच तथाब्रुवंतंपरुषंकर्णोमद्राधिपंतदा प रुषंद्विगुणंभूयःप्रोवाचाप्रियदर्शनं २ कर्णउवाच इदंतुमेत्वमेकाग्रःशृणुमद्रजनाधिप संनिधौधृतराष्ट्रस्यप्रोच्यमानंमया श्रुतं ३

त्रिचत्वारिंशः ननुकर्णसहस्रेणविनापिपरेजेतुंशक्यामयेतिशेषः कर्णसहस्रतुल्योहमेक ना ८ शल्यसहस्रतुल्योहमेवास्मीत्यर्थः ९।१० एवास्मीतिभावः १ भूयः गुणात्अधिकगुणं २ ३

पंचानांवक्ष्यमाणानांसिंधुःषष्ठीयासां अंतरमवकाशमाश्रिताः ७ गोवर्द्धनः गवांछेदनस्थानं सुभद्रंचत्वरंसुराभांडाश्रयभूतं एतद्द्वयंराजकुलस्यराज
गृहद्वारस्योपलक्षणं ८ वृत्तंचरित्रं १० धानाः भृष्टयवाः गौड्यासवं सुराविशेषं वाट्यायवान्नंवोराहृतौचमार्गेचेतिविश्वः वाट्यंक्रीतालब्ध्वाआशिनः भ

देशांश्चविविधांश्चित्रान्पूर्ववृत्तांश्चपार्थिवान् ब्राह्मणाः कथयंतिस्मधृतराष्ट्रनिवेशने ४ तत्रवृद्धः पुरावृत्ताः कथाः कश्चिद्द्वि
जोत्तमः बाह्लीकदेशंमद्रांश्चकुत्सयन्वाक्यमब्रवीत् ५ बहिःकृताहिमवतागंगयाचबहिष्कृताः सरस्वत्यायमुनयाकुरुक्षेत्रे
णचापिये ६ पंचानांसिंधुषष्ठानांनदीनांयेंतराश्रिताः तान्धर्मबाह्यानशुचीन्बाह्लीकान्परिवर्जयेत् ७ गोवर्द्धनोना
मवटः सुभद्रंनामचत्वरम् एतद्राजकुलद्वारमाकुमारात्स्मरामहे ८ कार्येणात्यर्थगूढेनवाहीकेषूषितंमया ततएषां
समाचारः संवासाद्विदितोमम ९ शाकलंनामनगरमापगानामनिम्नगा जर्तिकानामवाहीकास्तेषांवृत्तंसुनिंदितं १०
धानागौड्यासवंपीत्वागोमांसंलशुनैःसह अपूपमांसवाट्यानामाशिनःशीलवर्जिताः ११ गायंत्यथचनृत्यंतिस्त्रियोम
त्ताविवाससः नगरागारवप्रेषुबहिर्माल्यानुलेपनाः १२ मत्तावगीतैर्विविधैःखरोष्ट्रनिनदोपमैः अनावृतामैथुनेताःकाम
चाराश्चसर्वशः १३

क्षणशीलाः ११ वप्रेषुप्राकारभित्तिषु १२ अवगीतैः मललिंगादिविगीतशब्दैः अनावृताः स्वपरपुरुषविवेकहीनाः कामचाराः यथेष्टचारिणः १३